लङ्कारशास्त्रविलास :

lankarasastra Vilasah



Edited by
S.LALITHA

General Editor :
NATANA. KASINATHAN, M.A.

MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS SERIES - 73

ALAŃKĀRAŚĀSTRA VILĀSAḤ

Editor
S. LALITHA, Siromani, (M.A.)
Sanskrit Pandit,
Government Oriental Manuscripts Library, Madras-5

General Editor
Natana Kasinathan, M.A.,
Director,
Department of Archaeology
Madras - 113

Price Rs.54/-

Government Oriental Manuscripts Library, Madras-5
1995

GENERAL EDITOR'S NOTE

This is a work on poetics wherein 62 Arthalankaras have been dealt with. The work starts with a brief sketch of the definition and characterstics of the poetry.

The author is Ramasubramanyasastri (18th Cen. A.D)

I thank the Tamilnadu Government in general and in particular Mr.S.P.Ilangovan, I.A.S., and R.Christodass Gandhi I.A.S. for bringing out this publication. I also express my thankfulness to **Dr.S. Soundarapandian,** Curator, Govt. Oriental Manuscripts Library and S. Lalitha, Sanskrit Pandit, who edited this unpublished work.

By

Natana Kasinathan

PREFACE

Govt. Oriental Manuscripts Library is proud of pocessing a huge collection of manuscripts in various oriental languages.

So far, 102 titles have been published in Sanskrit language, including books, catalogues and bulletins.


The present edition Alankarasastravilasah is a treatise on poetics in Sanskrit language. This is the 73rd book published in the Govt. Oriental Manuscripts Series.

I thank the former secretary, Mr. S.P. Ilangovan I.A.S. Tamil Development department, and the present Secretary, Mr.R. Christodass Gandhi. I.A.S for bringing out this publication.

I thank Thiru. Natanakasinathan, for his efforts and adivce. I also thank Mrs.S.Lalitha, Sanskrit Pandit, who prepared the press copy of this work and edited.

Dr. S. Soundarapandian

M.A. (Tamil) M.A.(Eng).B.Ed,
Dip. in Skt, Phd.
Curator
Govt. Oriental Mss Library,



unbalanced balanced

fig 1

This is the reason why a handicapped person furnishes us unwanted look while a normal does not.

II. Man needs his control over his situation. With out this control his smooth survival is not possible. If he climbs up a tree, he must possess his full control over his body as well as his job. So, in this way, a sense of control must have had inculcated in primitive man's mind itself.

So, every man looks forward the display of control in every thing he sees.

If a woman walks keeping her full control over his body, he feels happy; because his sense of control is satisfied.

THEORY OF BEAUTY

— Dr.S. Soundarapandian,
M.A.,M.A.,B.Ed., Dip.Skt.,Ph.D.,
Curator
Govt.Oriental Manuscripts Library
Madras- 600 005.

Why certain things are celebrated as beautiful and others not beautiful?

Our theory tries to fetch answer to this which consists of six concepts :-

I Concept of Balance
II concept of Control
III Concept of Pain
IV Concept of Clean
V Concept of Energy
VI Concept of Blood Run.

I. The instinct of balance is innate in man. His two hands on either sides, his two feet on two sides, his two eyes on each side of his face etc. So, man expects that whatever he looks at should be well balanced. If it is not balanced, he opines that it is ugly. This is the reason why our ancient architecture portrays well balanced curves, balanced (fig.1) of flowers etc.




fig 2

He had wanted a clear path to walk liking relief to his painful feet. So, every fibre of his brain had been saturated with a sense of clean.

So, whichever was clean, his sense, above referred, was satisfied with. Hence his appreciation as beautiful.

'Clean', here, does not necessarily mean either bright or plain. It means only 'clear' sense.

What a beautiful colour ?- People say. why ?

Because, that particular colour satisfies his in born sentiment of clean. A dull colour does not give him a clear visual to him ; so he hates it. Otherwise what sin the dull colour did ?

We can observe this concept of control in ancient sculptures and paintings. In these, the feet size should be proportinate to the head size and so on thereby pointing us that the organs are under control of the body. Then only the onlookers will appreciate that the sculpture is a beautiful piece.

III. The third concept is mainly put forth to solve the riddle why is woman beautiful ?

Man's nerves, bones and muscles are always, irrespective of age, under pain. So, he wants to get rid of it. When he has a glance at a fleshy cheek, for example, his body system begins to smooth its pain making use of the fleshy part of the woman. This is the reason why bony woman does not appear beautiful in the eyes of man.

Man's mind thinks that his chest ache will be relieved when it embraces that of a bossomy woman. This is the reason why bossomy woman are appreciated.

Sometimes, the aching of our figures should also be minimised; So, our fingers appreciate smooth surfaces rather than the rough surfaces. Otherwise why should be dislike rough surface ?

IV. Man had craved for the clear days wanting libration from the suffocating dark nights (fig.2)



Music in union with blood run **noise not in union with blood run**

Fig 3

'Her voice is beautiful' - we utter. Why?

Because, her voice in a remarkable manner goes hand in hand with that of our blood run. As a result, our bodys system feels a full satisfaction. So, the beauty.

The bray of a donkey is execrated by us. Why? Because, that noise does not go in accordance with that of our blood throb. Otherwise, what evil did the animal do to us?

By proper understanding of the above Theory of Beauty, one could not only enhance the degree of happiness in life but also could develop countless technical nuances in their fields like sculpture, painting, art, fine art, cinematography, photography, textile, architecture, music and other territories.

Whatever mixed colour we prepare, that colour will be lauded as beautiful if only it could render a clean pose thereby proving this concept (No.4).

V. Concept of Energy.

Man had felt the need of energy to walk and talk. He had realised the need of the filling up of him empty stomach. So, a character had developed in his mind in which he felt happy whenever he came across something energetic.

So, man started telling beautiful when he send a stout cow or goat. Bony cow or goat was disliked by him because they were unable to satisfy his age old sense of appetite for energy.

Dried up fruits, trees etc are looking ugly to man only because of the clear concept. Otherwise what wrong they did to man?

VI. Concept of Blood run.

Blood circulates throught our body thereby creating a particular throb. Blood is periodically being pumped by the heart the sound of which can be heard by us. So, that outside sound which vibrates in oherence with that of blood is acclaimed. The one which does not sound in union with that of blood run is abherred (fig.3)

Another poet in Kuruntohai, a Sangam piece, unearths to us an information regarding Tondi, a town on Tamil land C.2000 years ago.

"The rice of the Tondy town
Is so white as the ghee
The ghee gave by the cow of the king Killi
The king whose car was might" (Kurn 210:1-3)

Names of tribes have been brought in short in immumerous sangam songs as an ornament to enhance poetic beauty. For example, in Narrinai,

"You man, living on the mountain
Where the little monkeys lick
the remains of the food left by the Kuravas"
(168:4-5)

the tribe name Kurava had been handled for such purpose.

In the same veins, we have another passage in Ahananuru:

"She is very precious
As precious as the wealth of Velirs
The tribe who have kept hidden their treasures!"
(372:4-5)

This time, the name of the tribe Velir had been made use of by the sangam poet for his poetic job.

Look at a poet who strikes a valuable note of history while delineating a comparison for a debacle.

HISTORY AS A RHETORIC DEVICE : A THEORY TO SANGAM LITERATURE

— **Dr. S. Soundarapandian**
M.A. (Tamil), M.A. (English), B.Ed, Dip Skt, Ph.D.,
Govt. Oriental MSS Library,
Madras University
Madras- 5

Viewing history as a rhetoric tool has not been contemplated in any of the Tamil grammar treatises.

But, careful study of the Sangam Literature proclaims that the ancient poets invariably have used history as a rhetoric instrument to beautify their poems.

Vignette of historical importance about kings, tribes, ancient towns and the like is considered by the idea 'history' here.

In Sangam books, rhetoric usage of history comes through the utterances of characters like **talaivan** (lover), **talaivi** [lady love], tozhi [friend of lady love] etc, in various contexts.

"Your promise never fails
Like the year of the king Pazhayan
that seldaom slips" **(Narr.10:8-9**

Here, a Sangam poet reveals about a king of the Tamil country, about whom little evidences are availabe, while writing just a simile.

purananuru, patirrupattu etc, where if such portrayals are clinched, the theme will be lost.

As explained before, the ripping age of history had been employed by the sangam poets to visualise exquisitely various phenomena of life such as ripsnorter attack of a king, riproaring mood of a lover, malee in a town, noise in an area, shining of clouds etc. such varigated utitity of 'history' itself clearly informs us that history must have been used as a jewel to add scintillation to ancient poems.

Sitting over this finding, we could suggets the following two features:-

1. To remember or remind the glorious past of a king itself had given a fulfilment to the souls of th ancient men and women.

2. Mentioning or linking with old chronicle had been a method of a social recognition. This may be reason why the talaivi hints at the history of king on whose hill or something like that the lovers enjoyed themselves; for, the open wooing was not accepted by the society on the Tamil soil during the sangam age.

This theory, holding of history as a rhetoric weapon, applied now only to the Tamil Sangam literature, may well be taken as a touchestone to test with the literature of all ancient languages of the time.

"The waters of river rush
with vigor and agreed
It was like the tuskers
Which ripped into the walls of Killi's enemies"!

(Anikurn:78:1-3)

So we get a tittle but very rare history of the ancient chieftain Killi who must have been a valorous one.

A reference of one Pandian had been sung while the poet draws a simile to the reddish body of a woman:

"O lady! You are reddened
As the soldiers who licked dust
By the frivolous warrior Pandian"

(Kali 57:10-11)

Not only these. We have abundant evidences to vindicate that the sangam poets had envisaged history for their poetic decoration as culled out earlier.

In Ahananuru, we have further spots (song numbers) 303, 311, 312, 322, 346 etc. In Ainkurunuru, 54, 56, 78, 88 etc. Narrinai- 18, 150, 167, 237, 265, 280, 301, 320, 381, 391 etc. Kuruntohai- 11, 15, 19, 34, 73, 80, 91, 100, 163, 164, 196, 258, 260, 298, 328, 393 etc.

In all these places, if we chip away at 'history', the poetic essence will not be diluted. At the same time, direct and deliberate sketches of ancient cities, things, castes etc have been painted in Tamil sangam works like

॥ श्री अलङ्कारशास्त्रविलासः ॥

॥ हरिः ओम् ॥

॥ श्री रामजयम् ॥

॥ श्री रामाय् नमः ॥

आद्यं रामायणाख्यं यत्काव्यं तस्यविभूषणम्।
ध्वनिवृत्याध्वरघूत्तंसं वन्दे सीतापतिं महः॥

न ह्यन्योऽर्हति काव्यानां यशोभाग्राघवादृते इति श्रीमदुत्तर रामायणीये चतुर्मुखोक्त्या श्रीरघुनाथान्यस्य विधिशिवादेः कस्यापि श्रीरामायणभारतादि काव्यानिरूपितध्वनिवृत्यपरपर्यायशोभाक्त्वं प्रतिषिद्धच श्रीरघुनाथस्यैव तद्भाक्त्वं प्रतिपादितम्। तादृशयशोनिरूपकस्यकाव्यस्य किं लक्षणमिति जिज्ञासायां तन्निरूपणीयमवश्यमिति निश्चित्य तन्निरूप्यते, रमणीयार्थप्रतिपादक शब्दत्वं काव्यत्वम्। रमणीयत्वं च लोकोत्तराह्लादजनकं ज्ञानगोचरत्वं लोकोत्तरत्वं च आह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभव साक्षिको जातिविशेषः। पुत्रस्तेजातः धनं ते दास्यामि इति वाक्येऽतिव्या मिवारणायाह्लादे लोकोत्तरत्व दत्तम्। तथा स्वविशिष्टजनकतावच्छेदकार्थ प्रतिपादकता संबन्धेन लोकोत्तरचमत्कृतित्ववत्वं काव्यत्वमिति फलितम्। यत्तुप्रतापरुद्रीये विद्यानाथेन अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमित्युक्तम्। तत्तुकाव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतं अर्थो न ज्ञातः इत्यादि विश्वजनीनव्यवहारेणार्थे काव्यत्वाभावावगत्योभयोश्शब्दार्थयोः काव्यत्वोक्त्यसम्भवात्। किं च काव्यत्वशब्दार्थयोः व्यासज्यवृत्तिप्रत्येक पर्यामांवा। नाद्यः, इदं एकोन द्वावितिवत् इदं श्लोकवाक्यं न काव्यमिति व्यवहारापत्तेः। न द्वितीयः। एकत्व सूर्येत्यादि रघुवंशग्रन्थ

ALAṄKĀRAŚĀSTRAVILĀSAH

Alaṅkārásāstravilāsa's author is Rāmasubramanya Sastri son of Aśvatthanarayana and desciple of Śivarama. He was an authority on sastra and lived at Tiruvasanallur, Tanjore. He was born in the last thirties and died in 1922 A.D. His works on several sastras are numerous and his commentaries on the upanisads are very much respected. In his Alaṅkāraśastravilāsa he criticises Vidyanatha's definition of poetry. His Bhaktȳanandaprakāśa is a treatise on Bhakti or devotion to God.

He wrote many other sastra works also 1. Anupanitasa nyasabhangah 2. Anantarya Vadah 3. Isopanisadvilasah 4. Aitareyapanisad Vilasah 5. Omkara vadarthah.

This is a work on Alankara sastram. It criticises the definition and the charactoristics of Poetry as laid down in Vidyanatha's Prataparudriya Sahitya darpana etc. and attempts to establish the author's view. There are 62 Arthalankaras starting from Upama to Samanyalankara in this book. This work is preserved under R.1803, R.1805 (leaf) and R.7207 (Paper) in this library.

S. Lalitha

Editor.

चमत्कारासमानाधिकरणो वाच्यमात्रचमत्कारः तत्व मध्यमकाव्यत्वम्। उदाहरणं - "यमुनावर्णनितनयमैनाकगवेषण लम्बीकृतजलधिजठरप्रविगिरि भुजायमानाया भागीरथ्यास्खीति।" अत्रोत्प्रेक्षा वाच्यैव चमत्कृतिहेतुः। यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तत्वं चित्रत्वापरपर्याय मधमकाव्यत्वम्। उदाहरणम्-

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजैत्राय गोत्रत्रात्रे नमो नमः॥

अत्रार्थचमत्कृतिश्शब्दचमत्कृतौ लीना। यद्यपियत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिः तदधमाधमं काव्यमेकाक्षरपद्यार्थावृत्तियमकपद्मबन्धादि महाकविभिः तत्र तत्र काव्येषु निबद्धं तथापि रमणीयार्थप्रतिपादकत्व-रूपकाव्यत्वानाक्रान्ततया तदुपेक्षितं तत्र उत्तमोत्तमकाव्यस्य ध्वनिरिति संज्ञा। द्विविधो ध्वनिः। शक्तिमूलो लक्षणामूलश्च। शक्तिमूलस्त्रिविधः। रसध्वनि वस्तुध्वन्यलङ्कारध्वनिभेदात्। रसध्वनिरसंलक्ष्यक्रम इत्युच्यते। वस्तुध्व निरर्थान्तरतिरस्कृतवाच्यः अत्यन्ततिरस्कृत वाच्यश्चेति द्विविधम्। रसो नाम रत्याद्यपरचिन्ताभग्नावरणचिदेव तस्य विशेष्यांशमादाय नित्यत्वं स्वप्रका शत्वञ्च विशोणीभूतरत्याद्यंशमादायानित्यत्वमितरभास्यत्वञ्च इति रसगङ्गाधर ग्रन्थरीत्या निरूपितरूपः। स च नवविधः। "श्रृंङ्गारः करुणश्शान्तः रौद्रोवीरोऽद्भुतस्तथा। हास्यो भयानकश्चेति बीभत्सश्चेति तेन वा।" इति रसगङ्गाधरोक्तेः श्रृङ्गारस्य स्थायीभावो रतिः, करुणस्य शोकः शान्तस्य निर्वेदः, रौद्रस्य क्रोधः, वीरस्योत्साह, अद्भुतस्य विस्मयः हास्यस्य हासः, भयानकस्य भयं, बीभत्सस्य जुगुप्सास्थायीभावः। श्रृङ्गाराद्या घटावच्छि न्नाकाशस्थानीयाः रत्यादिस्थायीभावाश्च घटस्थानीया इति विवेकः। रतिर्नाम स्त्रीपुंसयोः अन्योन्यालम्बनचित्तवृत्तिविशेषः। वैक्लव्याख्यश्चित्तवृत्तिविशेष श्शोकः। वस्तुविचारजन्माविषयविरागियो निर्वेदः। गुरुबन्धवधादिरूपपरमा पराधजन्मा प्रज्वलनाख्यः क्रोधः। परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः।

तदर्थवादाय काव्यद्वयव्यवहारापत्तेः। किञ्च त्वदुक्तकाव्यलक्षणे गुणालंकारादि निवेशो न युक्तः। उदित मण्डलं विधोः इति अभिसरणनिषेधपरेऽमीत्युक्ते जीवनाभावाविपरे गतोऽस्तमर्क इत्यादौ चाव्याप्त्यापत्तेः। किञ्च दोषाभावस्य लक्षणे निवेशो न युक्तः दुष्टकाव्यमिति व्यवहरानुपपत्तेः। न च कपिसंयो-गाभाववान् वृक्षः कपिसंयोगीतिवत् अंशभेदेन दुष्टत्वं तदंऽशावच्छे-देनादुष्टत्वघटितं काव्यत्वं च संभवतीति वाच्यम्। इदं पद्यं पूर्वार्धे काव्यं उत्तरार्धे न काव्यं इति सार्वजनीनव्यवहारप्रसङ्गात्। किञ्च शौर्यादि-वदात्मधर्माणां गुणानां हारादिवदुपस्कारकाणामलङ्काराणां च काव्यशरीरात्म-कलक्षणघटनानुपत्तिः। यत्तु रसवदेव काव्यमिति साहित्यदर्पणोक्तं तन्न। वस्त्वलंकारप्रधानानामकाव्यत्वापत्तेः। तच्च काव्यं उत्तमोत्तमोत्तममध्यमाध-मभेदाच्चतुर्विधम् व्यङ्ग्यार्थगुण भूतवाच्यार्थकशब्दत्वं उत्तमोत्तमकाव्यत्वम्। उदाहरणम् -

शयितासविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजन्दरमीलन्नयनानिरीक्षते॥

आलम्बनस्य नायकस्य सविधशयनाक्षिप्तस्य रहस्थानादेरुद्दीपनस्य विभावस्य तन्निरीक्षणादेरनुभावस्य त्रपौत्सुक्यादेर्व्यभिचारिणश्च संयोगाद्रतिरभिव्यज्यते। यत्तु चित्रमीमांसायां "निश्शेषच्युत चन्दनं स्तनतटमि"त्येतस्य उत्तरीयाकर्षणेन चन्दनच्युतेरन्यथासिद्धिरिति तत्परिहाराय निश्शेषग्रहणम्। चन्दनच्युतेः स्नान-साधारण्यव्यावर्तनेन संभोगचिह्नोद्घाटनाय तटग्रहणम्। स्नाने हि सर्वत्र चन्दनच्युतिस्स्यात् तव तु स्तनयोस्तटे उपरिभाग एव दृश्यते इयं आश्लेषकृतैवेति व्याख्याय इदमपि ध्वनेरुदाहरणमित्यनेन ध्वन्युदाहरणत्वमुक्तम्। तन्न। चन्दनच्युतेराश्लेषनिरूपिता साधारण्यरुपव्याप्तिमत्वस्य निश्शेषपदस्तनतटपदार्थवर्णनरीत्या सिद्धानुमानत्वेन व्यङ्ग्यार्थबोधकत्व-रूपव्यञ्जकत्वनिराकरणात् यत्र व्यङ्ग्यमप्रधानमेवसत् चमत्कृतिजनकं तत्वमुत्तमकाव्यत्वमुदाहरणम्। राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय। अत्र जानकीकुशलावेदनेन राघवश्शिशिरीकृत इति व्यङ्ग्यमाकस्मिककपिकर्तृकहनूमद्विषयककोपोपा-दकतया गुणीभूतमपि कामपि कमनीयतामावहति। यत्र व्यङ्ग्य

भावो नाम विभावादिव्यज्यमानहर्षाद्यन्यतमः हर्षस्मृतिव्रीडामोदधृतिशंका ग्लानिदैन्य चिन्तामदश्रमगर्वनिद्रामतिव्याधित्राससुमविबोध अमर्षावहित्था तोन्मादमरणवितर्कविषादौत्सुक्यावेगजडतालस्यासूयापस्मारचपलता प्रतिपक्ष-कृतधिक्कारदि जन्मानिर्वेदश्चेति त्रयस्त्रिंशद्व्यभिचारिणः। गुरुदेवनृप-पुत्रादिविषया रतिश्चेति चतुस्त्रिंशद्भावाः। रसाभासो नामानुचि-तविभावानुलम्बनो रसः। भावशान्तिः भावस्यानुपदोक्तस्य शान्तिः नाशः। भावोदयो भावस्योत्पत्तिः। भावसन्धिः अन्योन्यानभिभूतयोः अन्योन्या भिभावनयोग्ययोस्सामानाधिकरण्यम्। भावशबलत्वं भावानां बाध्यबाधकभावमापन्नानां उदासीनानां वा मिश्रणमेकचमत्कृति ज्ञानगोचरत्वम्। रसभावादीनां ध्वन्यत इति व्युत्पत्त्या व्यङ्ग्यत्वात् ध्वनित्वम्। न तु ध्वन्याख्यव्यञ्जनाविशेषरुपवृत्तित्वम्॥

॥ हरिः ओम् ॥

अथ संलक्ष्यक्रमध्वनिर्निरूप्यते। स द्विविधः। शब्दशक्तिमूलोऽर्थ शक्तिमूलश्चेति। आद्यो द्विविधः। व्यङ्ग्यस्य वस्तुत्वालंकारत्वद्वैविध्यात्। द्वितीयो द्विविधः, व्यङ्ग्यस्यार्थस्य वस्तुत्वालंकारत्वाभ्यां द्वैविध्यात।

शब्दशक्तिमूलवस्तुध्वनिर्यथा-

राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम्।
बाले वारय पान्थस्य वासदानविधानतः॥

अत्र उपभोगं देहीति वस्तु। राज्यपदशक्तिमूलानुरणनविषयः। राजपदाच्चन्द्रो-पस्थितावेव चन्द्रजनितभयवारणकारणत्वेनेमसुव्रतकर्तृकमञ्जु गर्जनाद्यैः वस्तुभिः कविकल्पिततत्वविरहेणस्वतस्संभवीभिरासने सरसिजोत्पत्तिध्वनन द्वाराशरदागमननैकटयरूप वस्तु व्यज्यते।

लक्षणामूलध्वनिर्यथा-

कृतं त्वयोन्नतं कृत्यं आर्जितं चामलं यशः।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः॥

अलौकिकवस्तुसन्दर्शनजन्माश्चर्याख्यो विस्मयः गंगादिविकार दर्शनजन्मा विकासाख्यो हासः। व्याघ्रादि दर्शनजन्मा परमानर्थविषयको वैक्लव्याख्यः भयम्। कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा। एवमेषां रत्यादीनां स्थायीभावानां लोके तत्तन्नायकगतानां यान्यालम्बनतया उद्दीपनतया वा कारणत्वेन प्रसिद्धानि तानि काव्यनाट्याभ्यां एष श्रृङ्गारादिषु व्यज्यमानेषु विभावशब्देन व्यपदिश्यन्ते। विभावयन्तीति व्यत्पुत्तेः। यानि चोक्तस्थायीभावकार्यतया व्यज्यन्ते तान्यनुभावशब्देन व्यपदिश्यन्ते। अनु पश्चात् भावयन्तीति व्युत्पत्तेः। यानि उक्तस्थायीभावैस्सह चरन्ति तानि व्यभिचारिशब्देन व्यपदिश्यन्ते। तत्र श्रृंगारस्य स्त्रीपुंसौ आलम्बने चन्द्रवसन्तरहःस्थानादयः उद्दीपनविभावाः। तन्मुखावलोकन तद्गुणश्रवण कीर्तनादयः अनुभावाः। स्मृतिचिन्तादयो व्यभिचारिणः। करूणस्य बन्धुनाशादयः आलंबनानि। तत्संबन्धिगृहतुरगाभरणदर्शनादयः तत्कथाश्रवणादयश्च उद्दीपकाः। गात्रक्षेपाश्रुपातादयोऽनुभावाः। ग्लानि, श्रममोहविषादादयः व्यभिचारिणः। शान्तस्य अनित्यत्वेन ज्ञानं जगदालंबनम्। वेदान्तश्रवणतत्परतापसदर्शनादि उद्दीपनम्। विषयारुच्यादयोऽनुभावाः। हर्षोन्मादस्मृतिमत्यादीया व्यभिचारिणः। रौद्रस्यायशस्कृत्पुरुषादिरालम्बनम्। तत्कृतोऽपराधादिरुद्दीपकः। वधबन्धादिफलकः नेत्रारुण्यदन्तपीडनपरुषभाषण शस्त्रग्रहणादिरनुभावः। अमर्षादयो व्यभिचारिणः। तत्र श्रृङ्गारो द्विविधस्संयोगो विप्रलम्भश्च। रतेस्संयोगकालावच्छिन्नत्वे प्रथमः वियोगकालावच्छिन्नत्वे द्वितीयः। संयोगश्च न दम्पत्योस्सामानाधिकरण्यं एकतल्पशयनेऽपीर्ष्या-दिसंभवेन विप्रलंभस्यवर्णनात्। अत एव न वियोगोऽपि वैयधिकरण्यम्। किंतु संयोगवियोगौ प्रकृतेऽन्तःकरणवृत्तिविशेषौ। श्रृंगाररसादीनामुदाहरणानि स्वयमेव द्रष्टव्यानि। विस्तरभयान्न लिख्यन्ते।

यत्तु चित्रमीमांसायामप्यय्यदीक्षितैर्वागर्थाविव संपृक्तावित्यत्र रसध्वनिनिरतिशयप्रेमशालिता व्यञ्जनादित्युक्तं तन्न। पार्वतीपरमेश्वरविषयकरतौ प्रधाने निरतिशयप्रेम्णो गुणीभावात् न हि गुणीभूतस्य रत्यादेः रसध्वनिव्यपदेशहेतुत्वम्। असंलक्ष्यक्रमध्वनिः रसभावतदाभासभाव शान्तिभाव, उदयभाव सन्धिभावशबलत्वभेदादनेकविधः रसो निरूपितः।

व्यतिरेकालङ्कारे चमत्कारिणोऽङ्गनिषेधस्य निरूपणाय प्रतियोगितया सादृश्यस्य ग्रहणात्। न चमत्कारित्वं अभेदप्रधानेषु रूपकापह्नुतिप्रभृतिषु भेदप्रधानेषु दृष्टान्तप्रतिवस्तूपमाप्रभृतिषु स्वयं चमत्कारिषु तत्तन्निष्पादकतया अवस्थितस्य सादृश्यस्य न चमत्कारित्वं, मुखमिव चन्द्र इति प्रतीपे चन्द्र इव मुखं मुखमिव चन्द्र इति उपमेयोपमायां सादृश्यस्य चमत्कारित्वात् लक्ष्यत्वमेव तयोः। यत्तु त्वयि कोपो ममाभाति सुधांशाविव पावकः इत्यत्र,

स्तनाभोगे पतन्भाति कपोलात्कुटिलालकः।
शशांकबिंबतो मेरौ लम्बमान इवोरग॥

इत्यादौ च उपमानस्यात्यन्तासंभावितत्वात् न सादृश्यमेव प्रतिवक्तुं शक्यते। कृतश्चमत्कारित्वमिति, तन्न। कविना उपमानं प्रकल्प्यते न सादृश्यस्याविकल्पने बाधकाभावात्। अत एव लक्षणे सादृश्यसत्वविशेषणं नोक्तम्।

भुजो भगवतो भाति चञ्चच्चाणूरचूर्णने।
जगन्मण्डलसंहारे वेगवानिव धूर्जटिः॥

अत्र धूर्जटि भगवद्भुजयोराकारेण सादृश्याभावात् प्रकारनिर्मुक्तस्य केवल भानस्याप्रयोजकतया चाणूरचूर्णनिमित्तकचाञ्चल्यजगन्मण्डलसंहारनिमित्त कवेगवत्वयोः भानप्रकारयोः अभेदाध्यवसानेनाभिन्नधर्मप्रकारक भाननिशेष्यत्वस्य साधारणधर्मस्य सिद्धया उपमासिद्धिः। अत्र चाणूरजगन्मण्डलयोः वस्तुतो भिन्नयोः महाकार्यत्वादिना सादृश्यात् बिम्बप्रतिबिम्बभावः। भिन्नयोः उपमनोपमेयधर्मयोः परस्पर सादृश्यत्वादभिन्नत्वेनाध्यवसितयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यलङ्कारिकसमयः। चूर्णनसंहारयोः चाञ्चल्यवेगवत्वयोस्त्वाश्रयभेदात् भिन्नयोरपि वस्तुत एकरूपतैवेति वस्तुप्रतिवस्तुभावः।

हंसीव कृष्ण ते कीर्तिः स्वर्गंगामवगाहते इत्याद्युदाहार्यम्। यत्तु चित्रमीमांसायां अप्पय्यदीक्षितैः उपमितिक्रियानिष्पत्तिमत्सादृश्य-वर्णनमदुष्टमव्यङ्ग्यमुपमालङ्कारः। स्वनिषेधापर्यवसायिसादृश्यवर्णनं वा

इयं कस्यचिदपकारिणां प्रत्युक्तिः। त्वया कृतेऽप्यपकारे परमखेदहेतौ मधुरमेव वचः भावेन परुषं तस्मिन्नेवंजातीयके मयि पापमाचरतस्तव पापिष्ठत्वं कथं शक्यते वक्तुमिति व्यङ्ग्यमिति अलं। यत्तु वृत्ति वार्तिके शक्त्या प्रतिपादकत्वं अभिधेत्यप्पय्यदीक्षितोक्तम्। तन्न। उपपत्तिविरोधात्। तथाहि इह शब्दाज्ज्ञाय मानायामर्थोपस्थितौ कारणीभूतं यदीयज्ञानं सा शब्द वृत्तिरभिधाख्या प्रस्तुताप्रतिपादकत्वस्य च प्रतिपत्तिहेतुत्वरूपस्य शब्दगतस्य न ज्ञानं प्रतिपत्तौ कारणम्। अतः कथं नाम भोगस्याभिव्यक्तिः।

अर्थशक्तिमूलवस्तुध्वनिर्यथा-

गर्जन्ति मञ्जुपरितो गत्वा धावन्ति सम्मुखं।
आवर्तन्ते विवर्तन्ते सरसीषु मधुव्रताः॥

इति श्रीरामसुब्रह्मण्य शास्त्रि विरचिते अलंङ्कारशास्त्रविलासे ध्वनिप्रकरणं समाप्तम्॥

हरिः ओम्

अथालङ्कारा निरूप्यन्ते।

यद्रूपाविच्छिन्ननिरूपितविषयिताविजातीयचमत्कृतिजनकतावच्छेदकत्वं अलङ्कारसामान्यलक्षणम्। साहश्यादिरूपोपमाद्यवच्छिन्नार्थविषयकज्ञानस्य अनुप्रासश्लेषयमकादिविशिष्टशब्दज्ञानस्य च विजातीयानन्दजनकत्वात्। उपमादौ अर्थालङ्कारे अनुप्रासयमकादौ शब्दांलङ्कारे च लक्षणसमन्वयः। व्यङ्ग्योपमायामतिव्याप्तिवारणाय चमत्कृतौ विजातोयेति वैजात्यं च व्यङ्ग्योपमाधीनचमत्कृतिभिन्नत्वं शब्दालङ्कारभिन्नत्वे सति अलङ्कारत्वमर्थालङ्कारलक्षणम्। अर्थालङ्कारभिन्नत्वे सति अलङ्कारत्वं शब्दलङ्कार लक्षणम्।

अथ उपमालङ्कारः।

साद्दश्यं सुन्दरं वाक्यार्थोपकारकमुपमालंकृतिः। सुन्दरत्वं चमत्कृत्याधायकत्वं चमत्कृतिरानन्दविशेषः। अनन्वये गगनं गगनाकारं इत्यत्र साद्दश्यस्यद्वितीयसद्दशवस्त्वन्तरनिन्र्तन मात्रार्थमुपात्तत्वेन स्वयमप्रतिष्ठानादचमत्कारित्वं तवाननस्यकूलनां दयाकूजलजं कथमित्यादौ

चात्र वाचकस्य द्विर्भावस्य सत्वात् नास्ति तल्लोपः। अपि तु, धर्मस्य लोपेऽपीति वाच्यं द्विर्भावस्य सादृश्यवाचकत्वोक्तेः भाष्यकैय्यटविरूद्धत्वात्।

गुणवचनो यश्शब्दो तस्य सादृश्ये द्वयोत्येद्वे भवत इति सूत्रार्थ इति कैयटः। इदं च कैयटवाक्यम्। अस्मिन्नेव प्रस्तावे चित्रमीमांसायां अप्पय्यदीक्षितैः लिखितं - यत्तु वाचकलुमायां, रूपयौवनलावण्य स्पृहणीयतराकृतिः पुरतो हरिणाक्षीणां एष पुष्पाय मृधीयतीति उदाहरणरचितं दृश्यते। द्वितीयप्रकरणारंभे मुखस्य पुरतश्चन्द्रो निष्प्रभइत्यप्रस्तुतप्रशंसेति लिखितम्। तन्न। पुरत इत्यस्य प्रकृते अपशब्दत्वात्। नगरवाचिनः पुरशब्दात् तसिल् प्रत्यये पुरत इति रूपं सिद्ध्यति। तच्च। प्रकृते असङ्गतार्थंहरिणाक्षिणां नगरादित्यर्थस्य प्रकृते असङ्गत्वात्। पूर्वशब्दस्य पुरादेशो पुर इत्येव सिद्ध्यति। न पुरत इति। अत एवामुं पुरः पश्यसि देवदारुमिति महाकविप्रयोगः। गच्छति पुरश्शरीरमिति कालिदासप्रयोगश्च। अत एवाहुर्वैय्याकरणाः पत्या पुरतस्सरता आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि पुरतस्सुदती समागतं मामित्यादयस्सर्वेऽपि व्याकरणाज्ञानमूलापशब्दा इति उपमानोपमेयसाधारण धर्म सादृश्य वाचकानां चतुर्णां पूर्णोपमात्वसंपादकानां अभावे लुमोपमा। सा चानेकविधा।

''वर्ण्योपमानधर्माणामुपमावाचकस्य च। एकद्वित्र्यनुपादानैर्भिन्ना लुमोपमाष्टधा।'' तटिद्गौरीन्दुतुल्यास्या कर्पूरन्तीदृशोर्मम। कान्त्या स्मरवधूयन्ती दृष्टा तन्वीरहोमयेत्यु''क्तरीत्या विज्ञेया।

॥ उपमालङ्कारप्रकरणम् ॥

॥ उपमेयोपमालङ्कारः ॥

तृतीयसदृशव्यवच्छेदबुद्धिफलकवर्णनविषयीभूतंपरस्परोपमानोपमेय भावमापन्नयोरर्थयोस्सुन्दरं सादृश्यं उपमेयोपमालङ्कारः। तटिदिव तन्वी भवतीवेयं तटिन्नता गौरीत्यत्र परस्परोपमायामतिव्याप्तिवारणाय भूतान्तम्। अत्र तानवगौरिमभ्यामनुगामिधर्माभ्यामुपमाद्वयं प्रयोजितम्। न तृतीयं सदृशं व्यवच्छिन्नमिति एकेन धर्मेण एकप्रतियोगिके अपरानुयोगिके सादृश्ये निरूपिते अपरप्रतियोगिकस्यापि एकानुयोगिकस्य तेन धर्मेण सादृश्यस्यार्थतस्सिद्धतया

तथाभूतं तथेति लक्षणद्वयमुक्तम्। तन्न। वर्णनस्य विलाक्षणशब्दात्मकस्य विलक्षणज्ञानात्मकस्य वा शब्दवाच्यताविरहेणार्थालङ्कारत्वबाधात्। तस्य सर्वधा व्यङ्ग्यत्वेनाव्यङ्ग्यत्वविशेषणवैय्यर्थ्याच्च। यदि साहश्यवर्णनमित्यनेन वर्णनाविषयीभूत साहश्यं विवक्षितं तदा यथा गौः तथा गवय इत्यत्र उपमालङ्कारापत्तिः। एतद्दोषपरिहारार्थं चमत्कारित्वं लक्षणे निवेशनीयमिति चेत् तर्हि उपमितिक्रिया निष्पत्तिविशेषणवैय्यर्थ्यं न ह्यनिष्पन्नमापाततः प्रतीयमानं साहश्यं चमत्कृतिमाधत्ते। द्वितीयलक्षणे निषेधापर्यवसायित्वं निरर्थकम्। व्यतिरेके कमलादि साहश्यनिषेधस्यानन्वये सर्वसादृश्यनिषेधस्य चमत्कारितया तदर्थं सादृश्यनिरूपणस्यावश्यकत्वेन तात्पर्यविषयतया तद्भिन्ने पर्यवसानस्य वक्तुमशक्यत्वात्। किञ्च लक्षणे साहश्यपदं व्यर्थम्। उपमितिक्रिया निष्पत्तिमद्वर्णनमुपमेत्येतावता स्वाभीष्टसिद्धिसम्भवात्। यत्तु प्रतापरुद्रीये

> स्वतस्सिद्धेन भिन्नेन सम्मतेन च धर्मतः।
> साम्यमन्येन वर्णस्य वाच्यं चेदेकदोपमा॥

इति विद्यानाथोक्तं, तन्न। व्यतिरेकनिषेध प्रतियोगिनि साहश्येऽतिव्याप्तेः। यत्तूपमानोपमेयत्वयोग्ययोः द्वयोरर्थयोः हृद्यं साधर्म्यमुपमेति प्राचां लक्षणं, तन्न। हृद्यतामात्रेणनिर्वाहे विशेषणान्तरवैय्यर्थ्यात्। यत्तु साधर्म्यमुपमाभेद इति काव्यदर्पणोक्तं लक्षणं तदपि मन्दम्। सादृश्यस्य भेदघटितत्वेन भेदेति विशेषणवैयर्थ्यात्। सादृश्यस्याखण्डत्वेऽपि भेदव्याप्तत्वेन भेदेति विशेषणवैयर्थ्यात्। व्यतिरेके निषेधप्रतियोगिनि सादृश्येऽतिव्यापनाच्च। यत्तु प्रसिद्धगुणेनाप्रसिद्धगुणस्य उपमेयस्यसादृश्यमुपमेत्यलङ्काररत्नाकरोक्तं, तन्न। श्लेषमूलकोपमायां चम्पूरामायणे बुधमिव सोमसुतं कुशिकसुतमित्यत्र तादृश शब्दात्मकस्य धर्मस्य कविनैव कल्पनात्। तेन रूपेणोपमानस्याप्रसिद्धेः श्रीः। यत्तु चित्रमीमांसायां धर्मलुप्तोपमायां पटुबटुर्देवदत्त इत्यस्यापि उदाहरणत्वं, "प्रकारे गुणवचनस्येति" सूत्रेण सादृश्ये द्विर्भावविधानादित्युक्तम्। तन्न। अत्रवाचकस्याप्यनुपादानात् धर्मवाचकोभयलुप्तोदाहरणत्वेन धर्मलुप्तोदाहरणत्वासम्भवात्। उभयलुप्तायां धर्मलुप्तत्वस्यापि सत्वात् धर्मलुप्तोदाहरणत्वमिति चेत् तर्हि एकलुप्तास्विव द्विलुप्तायाः त्रिलुप्तायाश्च ग्रहणात् तयोः पृथगुपादानं भवद्भिः अन्यैर्वा कृतं असंबद्धं स्यात्। न

सादृश्यं तदनन्वयालङ्कारः। इन्दुरिन्दुरिव श्रीमानित्याद्युदाहरणम्।

नखकिरणपरं पराभिरामं किमतिपदाम्बुरुहद्वयं मुरारेः।
अभिनवसुरदीर्घिका प्रवाहप्रकरपरीतमिव स्फुटं चकाशे॥

इत्यत्र हरेः पदाम्बुजं स्वात्मनैव सुरदीर्घिकाप्रवाहप्रकरपरीतेन उपमीयते। न ह्यत्र सादृश्यवर्णनस्य द्वितीयसदृशव्यवच्छेदः फलं तस्यासंप्रतिपत्तेः। अस्या अनन्वयत्ववारणाय संभूतान्तम्।

स्तनाभोगे भाति कपोलात्कुटिलालकः।
सुधांशुबिम्बतो मेरौ लम्बमान इवोरग॥

इति कल्पितोपमानिकायामुपमायां अतिप्रसंगवारणाय एकोपमानोपमेयकमिति। अत्रासत उपमानस्य कल्पनया सदुपानं नास्तीति द्वितीयसदृशाव्यवच्छेदस्यास्ति प्रतीतिः। यत्तु चित्रमीमांसायां-

अद्य या ममगोविन्द जाता त्वयि गृहागते।
कालेनैव भवेत्प्रीतिस्त्वैवागमनात्पुनः॥

अत्र गृहागतं श्रीकृष्णं प्रति विदुरवाक्ये इयं त्वदागमनप्रभवप्रीतिः बहुकालव्यवहितेन पुनरपि त्वदागमनेनैव भवेत् नान्येनेत्युक्तिभङ्ग्या त्वदागमनप्रभवप्रीतिस्सैव सदृशी न त्वितरप्रभवेति व्यज्यत इति अनन्वयत्वमुक्तम्। तन्न। अद्य त्वदागमनजन्यप्रीतेः वारान्तर त्वदागमनजन्मप्रीतेश्च परस्परभिन्नत्तया एकोपमानोपमेयकसादृश्याभावात्।

इति अनन्वयप्रकरणम्॥

॥ अथ असमालङ्कारः ॥

सर्वदैवोपमानिषेधोऽसमालङ्कारः। अयं चानन्वये व्यङ्ग्योऽपि अनन्वयचमत्कारानुगुणतया रूपकदीपकादौ उपमेव न पृथगलङ्कारव्यपदेशं भजते। वाच्यतायां तु स्वातन्त्र्येण चमत्कारितया पृथग्व्यपदेशभाक्।

भुवनत्रितयेऽपि मानवैः पूरिपूर्णे विबुधैश्च दानवैः।
न भविष्यति नास्ति नाभवत् नृपयस्ते भजते कुलापदम्॥

शब्देन पुन: "धर्मोऽर्थइव पूर्णश्रीरर्थोधर्मइव त्वयि।" इत्यत्र तदुक्ति: स्वनैरर्थक्यपरिहाराय तृतीयसदृशव्यवच्छेदमाक्षिपतीति युक्तम्। तस्योक्तालङ्कारोदाहरणत्वं प्रकृते च एकेन तानवरूपेण धर्मेण तटित्प्रतियोगिककामिन्यनुयोगिकसादृश्ये निरूपिते तेनैव कामिनीप्रतियोगिकस्य तटिदनुयोगिकसादृश्यस्यार्थतस्सिद्धावपि न गौरिमत्वेन सिद्धिरिति तदर्थमुपात्तस्य द्वितीयसादृश्य वचनस्य न तृतीय सदृशव्यवच्छेदफलकत्वम्।

"सदृशी तव तन्विनिर्मिता विधिना नेति समस्तसम्मता।
अथचेन्निपुणं विभाव्यते मतिमारोहति कौमुदी मनाक्॥

इत्यत्र तृतीयसदृशव्यवच्छेदकवर्णनविषयसादृश्ये अतिव्याप्तिवारणाय परस्परमिति लिङ्गवचनभेदादिदुष्टसादृश्यवारणाय सुन्दमिति। यत्तु चित्रमिमांसायां अप्पय्यदीक्षितै: अन्योन्येनोपमा बोध्या वृत्या वृत्यन्तरेण वा। एकधर्माश्रया या स्यात् सोपमेयोपमा मता। इत्युक्त्वा अन्योन्येनान्योन्यप्रतियोगिकत्वविशिष्टापि काक्वा व्यञ्जनाव्यापारेण वृत्यन्तरेण शक्त्या वा बोध्या वेद्या एकधर्माश्रया एकधर्मप्रयोज्या या उपमा सा उपमेयोपमेति व्याख्यातम्। तन्न।

अहं लतायास्सदृशीत्वगर्वं गौरांगिगर्वं न कदापि याया:।
गवेषणेनालमिहापरेषांशषापिकुल्या तव तावदस्ति॥

इत्यत्र तनुत्वादिना अन्योन्यप्रतियोगिकत्वविशिष्टाया उपमायाश्शक्त्याबोधनात् उपमेयोपमालङ्कारापत्ते:। न चात्रान्योन्यप्रतियोगिकत्वमुपमायां न प्रतीयते लतादिसंबन्धिसादृश्याश्रयत्वस्यैवास्मत्पदार्थान्वयादितिवाच्यं, मुखस्य सदृशश्चन्द्र: चन्द्रस्य सदृशं मुखमित्यत्राव्याप्त्यापत्ते:। न चाहं लतायां इत्यस्य लक्ष्यत्वमेवेति शङ्क्यम्। गर्वमात्रनिरासपरत्वेन उत्तरार्धोपमायास्तृतीयसदृशस्य व्यवच्छेदाप्रतिपत्ते:। भवद्भिरेव तृतीयसदृशव्यवच्छेदफलकत्वस्य कुवलयानन्दे उपमेयोपमायां प्रदर्शितत्वात् इत्यलम्।

इति उपमेयोपमाप्रकरणम्॥

॥ अथ अनन्वयालङ्कार: ॥

द्वितीयसदृशव्यवच्छेदफलकवर्णनं विषयभूतं यदेकोपमानोपमेयकं

यत्तु अप्पय्यदीक्षितैः स्मृतिस्सादृश्यमूलाया वस्त्वन्तरसमाश्रया।
स्मरणालंकृतिस्सा स्यात् अव्यङ्ग्यत्वविशेषिता॥

यथा

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्षीचकार।
सपदिगतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः॥

यथा वा

दिव्यानामविकृतिविस्मयांपुरस्तादंभस्तस्फुरदरविन्दचारुहस्तम्।
उद्वीक्ष्यश्रियमिव कांचिदुत्तरन्तीमस्मार्षीज्जलनिधिमन्थनस्य शौरिः॥

एकत्र सदृशदर्शनात्तत्सदृशकर्मिका स्मृतिः। इतरत्र सदृशदर्शनात् तत्सदृशलक्ष्मीसंबन्धिनो जलनिधिमन्थनस्य स्मृतिः। उभयत्रापि सादृश्य मूलकवस्त्वन्तर स्मृतित्वमवशिष्टं सदृशासदृशसाधारण्याय लक्षणे वस्त्वन्तर ग्रहणमर्थवत्।

"सौमित्रे ननु सेव्यतां तरुतलं चण्डांशुरुज्जृंभते।
चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति॥"
वत्सैतदविदितं कथं नु भवता धत्ते कुरङ्गयतः
क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि॥"

अत्र कुरङ्गसंबन्धिनस्तन्नयनस्य स्मरणा तत्सदृशसीतानयनस्मृतिः। सीता स्मृतिश्च व्यङ्ग्या अलङ्कार्या च। तद्व्यावृत्यर्थं अव्यङ्ग्यत्वविशेषणमित्युक्तम्। तन्न। सादृश्यमूलास्मृतिरित्येतावता केशपाशस्मरणस्येव जलनिधिमन्थनस्मरण स्यापि सङ्ग्रहात्। वस्त्वन्तरसमाश्रयत्वविशेषणमनर्थकं एकत्र सादृश्यदर्शनोद्बुद्धसंस्कारजन्यत्वेन अपरत्र च सादृश्य दर्शनोद्बुद्धसंस्कारज लक्ष्मीस्मरणोद्बुद्धसंस्कारजन्यत्वेन च सादृश्यमूलत्वस्याविशेषात्। न हि सादृश्यमूलेत्युक्ते

इत्युदाहरणम्।

॥ इति असमाप्रकरणम् ॥

॥ अथ उदाहरणालङ्कारः ॥

सामान्याकारेण निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोरूच्यमानोऽवयवावयविभावः उदाहरणालंकारः। अर्थान्तरन्यासवारणाय उच्यमान इति वचनक्रिया च इव एवं यथानिदर्शन दृष्टान्तान्यतमशब्दाधीना विवक्षिता न तु सादृशादि शब्दाधीना। न च इवादिशब्दानां सादृश्यवाचितया अवयवावयविभावे सामान्यविशेषात्मके वृत्यसिद्धिरिति शङ्कयम्। इव शब्दस्य उत्प्रेक्षायामिवात्रापि लक्षणावृत्तिसंभवात्।

अमितगुणोऽपि पदार्थोदोषेणैकेन निन्दितो भवति।
निखिलरसायनराजो गन्धेनोग्रेण लशुन इव॥

इत्युदाहरणम्। धात्वर्थमुख्यविशेष्यकशाब्दबोधपक्षे अमितगुणपदार्थकर्तृक-मेकदोषहेतुकं निन्दाविषयीभवनं निखिलरसायनराजलशुनकर्तृकउग्रगन्धहे-तुकनिन्दाविषयीभवनावयवकमिति बोधः।

अतिमात्रबलेषु चापलं विदधानः कुमतिर्विनश्यति।
त्रिपुरद्विवि वीरतां वहन् अवलिप्तः कुसुमायुधो यथा॥

इत्युदाहरणान्तरम्।

इति उदाहरणालङ्कारः॥

॥ अथ स्मरणालङ्कारः॥

सादृश्यज्ञानोदुद्धसंस्कारप्रयोज्यं स्मरणं स्मरणालङ्कारः।

एकीभवत्प्रलयकालप्रयोधिकल्पमालोक्य संगरगतं कुरूवीरसैन्यम्।
सस्मार तल्पमहिपुङ्गवकायकान्तं निद्रां च योगकलितां भगवान्मुकुन्दः॥

इत्युदाहरणम्। अत्र यद्यपि तल्पनिद्रास्मरणं न तल्पनिद्रासाहश्य दर्शनोद्बुद्धसंस्कारप्रयोज्यं, तथापि सैन्यगतंप्रयोधिगतसादृश्य दर्शनोद्बुद्ध पयोधिविषयकसंस्कारजन्यपयोधिस्मरणाधीनत्वात् भवत्येव तस्मिन् उक्तप्रयोज्यत्वम्। न हि सादृश्ये स्मर्यमाण संबन्धित्वं विवक्षितं ये नात्र न भवेत्।

निदर्शनव्यावृत्त्यर्थं बिंबाविशिष्ट त्वमित्येतदयुक्तम्। मुखं चन्द्र इत्यादि रूपकान्तर इव सत्यपि तादात्म्यारोपे नदं रूपकम्। अपि तु निदशनित्यस्य वक्तुमयुक्तत्वात्। अन्यथा मुखं चन्द्र इत्यपि निदर्शनोच्यता निरस्य तां च रूपकदाक्षिण्यकौपीनम्॥

इति रूपकप्रकरणम्।

॥ अथ परिणामाङ्कारः ॥

विषयी यत्र विषयात्मना प्रकृतोपयोगीनस्वातन्त्र्येण स परिणामालङ्कारः। अत्र च विषयाभेदो विषयिण्युपयुज्यते। रूपके तु नैवमिति रूपकादस्य भेदः।

"अपारे संसारे विषयविषसारण्यसरणौ
मम भ्रामं भ्रामं विगलितविरामं जडमतेः।
परिश्रान्तस्यायं तरणितनया तीरनिलय
स्समन्तात्सन्तापं हरिनवतमालं तिरयतु"

इत्युदाहरणम्। भगवदात्मतयैव तमालस्य संसारसन्ताप निर्वर्तनक्षमत्वं प्रतापरुद्रीये नरसिहधरानायके वसन्तवर्णनि। अपि राजानमाक्रम्य यशो यस्य विज़ृंभते इत्यत्र राजपदेन चन्द्रेविषये निर्दिष्टे तत्रारोप्यमाणस्य नृपस्यारोप्यमाणकार्योपयोगिनः प्रतीतेः परिणामो व्यज्यते इत्युक्तम्। तद्दूषितमप्पय्यदीक्षितैः आरोप्यमाणस्य नृपस्य नृपात्मनैव क्रमेणोपयागो न चन्द्रात्मनेति ग्रन्थेन इति अप्पय्यदीक्षितोक्तमसङ्गतं प्रतापरुद्रीयोक्तमेव युक्तमिति पण्डितजगन्नाथैः रसगङ्गाधरे अत्र विज़ृम्भणं नाम न केवलं प्रागल्भ्यं कवेभिप्रेतं येन यशः कर्तृकाक्रमेण नृपस्य नृपात्मतयैव कर्मतयोपयोगः स्यात्। अपि तु निरतिशयनैर्मल्यगुणवत्तायां स्वसमानजातीयद्वि-तीयराहित्यप्रयुक्तः प्रौढिविशेषः। आक्रमणं तु न ह्युद्भावः। एवं च, एवंविधं विज़ृंभणे चन्द्रकर्मकमेवाक्रमणमुपयुज्यते। न तु नृपकर्मकमितिविषयितयापि व्यज्यमानस्य चन्द्रात्मनैवाक्रमणोपयोग इति रमणीयमेव विद्यानाथोक्तमिति ग्रन्थेन दूषितम्॥

इति परिणामप्रकरणम्॥

सदृशविषयेति लभ्यते। येन जलनिधिमन्थनस्मृतेरसंङ्ग्रहः स्यात्। अव्यङ्ग्यत्वविशेषणमपि व्यर्थम्। तत्र सीतानयनादिस्मृतिः नालङ्कार्या, येनस्मृतेरलङ्कारत्वं न भवेत्। किंतु जानक्यालम्बनः निशासमयोद्दीपितः सन्तापादिना अनुभावितः उन्मादेन सञ्चारिणा परिपोषितो विप्रलम्भः। प्रधानत्वेनालङ्कार्यः तस्य च स्मृतिरुत्कर्षहेतुत्वादलङ्कारः एव। न हि व्यङ्ग्यत्वालङ्कारत्वयोर्विरोधः। नित्यव्यङ्ग्यानां रसभावादीनामपि परांगताया मलङ्कारत्वस्य सर्वलङ्कारिकाभ्युपगतत्वात्॥

इतिस्मरणालङ्कारप्रकरणम्॥

॥ अथ रूपकालङ्कारः ॥

उपमेयतावच्छेदकरूपेणोपमेये शब्दान्निगीर्यमानमुपमानतादात्म्यं रूपकम्। तदेव उपस्कारकत्वविशिष्टमलङ्कारः। अपह्नुति भ्रान्तिमदतिशयोक्ति निदर्शनवारणाय उपमेयतावच्छेदकपुरस्कारेणेति उपमेयतावच्छेदकस्यापह्नुतौ स्वेच्छया निषिध्यमानत्वात् भ्रान्तिमति तज्जनकदोषेण प्रतिषिध्यमानत्वात् अतिशयोक्ति निदर्शनयोश्च साध्यवसानलक्षणामूलत्वात् नास्ति पुरस्कारः। मुखं चन्द्र इति प्रात्यक्षिका हार्या निश्चयविषयचन्द्रतादात्म्यवारणाय शब्दादिति नूनं मुखं चन्द्र इत्युत्प्रेक्षावारणाय निश्चयमानमिति उत्प्रेक्षायाश्च संभावनारूपत्वेन न निश्चीयत्वं उपमानोपमेयविशेषणाभ्यां सादृश्यलाभात्। सुखं मनोरमा रामेत्यादि शुद्धारोप विषयतादात्म्यव्यावृत्तिः। "त्वत्पादनखरतिनियो रञ्जयति यावकैः इन्दुं चन्दनलेपेन पण्डरीकुरूते हि" स इत्युदाहरणम्। अत्र कर्त्रोस्तादात्म्यं शाब्दः। यत्तु चित्रमीमांसायां

बिम्बाविशिष्टनिर्दिष्टे विषयोयद्यनिह्नुते।
उपरञ्जकतामेति विषयीरूपकं तदा॥

बिंबाविशिष्ट इति विशेषणात् त्वत्पादनखरक्तानां यदलक्तकमार्जनम्। इदं श्रीखण्डलेपेन पाण्डरीकरणं विधोरिति निदर्शनव्यावृत्तिः। विषयस्य मार्जनस्यालक्तकादिरूपविम्बविशिष्टत्वात् निषेधास्पृष्टेत्यर्थकेन अनिह्नुते इत्यनेन अपह्नुतिव्यावृत्तिः। आभास्यताद्रूप्यनिश्चयगोचरतामित्यर्थकेन उपरञ्जकतामित्यनेन सन्देहोत्प्रेक्षादिवारणमिति। तन्न। त्वत्पादनखरक्तानामिति

चन्द्रत्वादिनानाकोटिक एवेतिक्वाव्याप्तिः, न चात्र चन्द्रादिधर्मिको युक्तस्संशयो वक्तुं तर्हि प्रजापतेः प्रथमोद्देशो न स्यात्।

इति संशयप्रकरणम्॥

अथ भ्रान्त्यलङ्कारः॥

सदृशे धर्मिणि तादात्म्ये धर्म्यन्तरप्रकारको नाहार्यस्सादृश्यप्रयोज्यं चमत्कारिनिश्चयः भ्रान्त्यलङ्कारः। अयमेव भ्रान्तिमानित्युपचर्यते। रूपकेऽति व्याप्तिवारणायानाहार्य इति। संशयवारणाय निश्चय इति। इदं रजतमिति भ्रमवारणाय चमत्कारीति। अत्र चमत्कारित्वं कविप्रतिभानिर्वर्तितत्वम्। "अकरूणहृदय प्रियतम मुञ्चामि त्वामितः परं नाहमि"त्यत्र नायिका-सन्देशरहस्योक्तौ व्यज्यमानस्योन्मादस्य वारणाय सादृश्यप्रयोज्येति। अत्र निश्चये एकत्वं विवक्षितम्। अन्यथा अनेकग्रहीतृकएकविशेष्यकानेकप्रकारक भ्रान्तिं समुदायात्मके उल्लेखेऽतिप्रसङ्गापत्तेः।

कनकद्रवकान्तिकान्तया मिळितं राममुदीक्ष्य कान्तया।
चपलायितवारिदभ्रमान्ननृते चातकपोतकैर्वन॥

इत्युदाहरणम्। अत्र चातकगतहर्षोपस्कारकतया तद्गतभ्रान्तिरलङ्कारः।

इति भ्रान्तिमत्प्रकरणम्॥

॥ अथ उल्लेखालङ्कारः ॥

एकस्य वस्तुनो निमित्तवशात् यदनेकैर्ग्रहीतृभिरनेकप्रकारकग्रहणं तदुल्लेखः।

"अधरंबिम्बमाज्ञाय मुखमब्जं च ताडिते। कीरश्च चञ्चरीकाश्च विन्दन्ति परमां मुदम्॥" इत्यत्र कीरचञ्चरीकाभ्यामधरवदनयोर्बिम्बत्वेनाब्जत्वेन च ग्रहणे भ्रान्तिरुपे अतिप्रसंगवारणायैकस्य वस्तुन इति धर्मस्यात्माभागधेयं क्षमया इत्यादि मालारूपकेतिव्याप्तिवारणायानेकैर्ग्रहीतृभिरिति।

"नृत्यत्वद्धाजिराजिप्रखरखुरपुटप्रोच्छतैर्धूलिजालै
रालोक्यालोक भूमिधरमतुलनिराकारभावं प्रयाते।

॥ श्रीः ॥

॥ अथ सन्देहालङ्कारः ॥

साद्दश्यमूला भासमानविरोधका समबलनानाकोटयवगाहिनी धीरमणीया, संन्देहालङ्कृतिः।

अधिरोप्य हरस्य हन्त चापम्
परितापं प्रशमीय बान्धवानाम्।
परिणेष्यति वा न वा युवा
निरपायं मिथिलाधिनाथ पुत्रीम्॥

इत्यत्र मिथिलास्थजनोक्तौ तच्चिन्ताभिव्यञ्जके संशयमात्रे अतिव्याप्तिवारणाय साद्दश्यमूलेति साद्दश्यज्ञानरूपदोषजन्येत्यर्थः। मालारुपकातिव्याप्तिवारणाय भासमानविरोधकेति। उत्प्रेक्षावारणाय समबलेति उक्तविशेषणद्वयप्राप्तस्यानेकत्वस्य स्फुटत्वार्थं नानेति स्थाणुर्वा पुरूषो वेति तार्किकसंशयव्यावृत्तये रामणीयेति चमत्कारिणीत्यर्थः।

"मरतकमणिमेदिनी धरो वा।
तरुणतरस्तरुरेष वा तमालः॥
रघुपतिमवलोक्य तत्र दूराद्दष्टिनिकरैरिति संशयः प्रपेदे॥"

इत्युदाहरणम्। यत्तु अप्पय्यदीक्षितैः
"अस्यास्सर्गविधौ प्रजापतिरभूच्चन्द्रोनुकान्तिप्रदः,
श्रृंगारैकरसस्स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं सविषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥"

इत्यत्र चन्द्रादीनां सन्देहधर्मिणामेवानेकत्वं। प्रकारस्तु वर्णनीयवनितासृष्टत्वमेकमेवेति अनेककोटिकत्वाभावात्। संशय लक्षणस्याव्याप्तिरुक्ता। तन्न। अस्यास्सर्गविधौ यः प्रजापतिरभूत्स किं नु चन्द्रः किं नु मदनः किं वा वसन्त इति संशयः प्रजापतिधर्मिकः

संबन्धेनोत्प्रेक्षायास्संसर्गान्तरेण उत्प्रेक्षायाश्च संग्रहाय तयोरन्यतरत्वेन निवेशः। "लोकोत्तरप्रभावं त्वां मन्ये नारायणं परम्।" इत्यत्र तादृशप्रभावस्य नारायणेतरावृत्तित्वनिश्चयदशायं सामग्र्यभावेन तादृशसंभावनाया अनुदयात् नारायणेनानेन प्रायशो भवितव्यमिति संभवत्संभावनायामतिव्याप्तिवारणाय तद्भिन्नत्वेनेति दूरस्थोऽयं देवदत्त इवाभाति इत्यादौ आकारसाम्य रूपसाधारणधर्मसंबन्धनिमित्तायां संभावनायामतिप्रसङ्गवारणाय तद्भिन्नत्वेनेति रमणीयत्ववचोत्प्रेक्षा वाच्यव्यङ्ग्यभेदेन द्विविधा इत्येकं, वस्तुहेतुफलैस्त्रिविधा। "तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिर्भुजायमानाया भगवत्या भागीरथ्यास्सखी" इत्याद्युदाहरणम्॥

इति उत्प्रेक्षाप्रकरणम्॥

॥ अथ अतिशयोक्तिरलङ्कारः ॥

विषयस्य निगरणमतिशयः तस्योक्तिरतिशयोक्तिः। निगरणं च विषयितावच्छेदकरूपेण विषयस्य विषयिवाचकपदेन बोधनम्। रूपके तु विषयस्य विषयतावच्छेदरूपेणापि भानमिति शेषः।

नयनानन्दसन्दोह कुन्दिलीकरणक्षमा।
निरयश्चाशुसन्तापं कान्तिकादम्बिनी मम ॥

अत्र भगवतो मूर्तिः निगीर्णा। कान्तिकादम्बिनीत्वेनैव तत्पदेन भगवन्मूर्ते र्बोधितत्वात् । यत्तु अप्पय्यदीक्षितैः संबन्धातिशयोक्तिस्स्यादयोगे योगकल्पनं "सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् इत्युक्तं तन्न। अत्रैव स्पृशन्ती वेन्दुमण्डलमित्युक्तौ वाचकोत्प्रेक्षाया आवश्यकत्वेन इवशब्दाभावे गम्योप्रेक्षात्वस्यावश्यकत्वात् । तथैवालङ्कारिकैस्सवैरभ्युपेतत्वात्॥

इति अतिशयोक्तिप्रकरणम् ।

॥ अथ तुल्ययोगितालङ्कारः ॥

द्वयोः प्रकृतयोरप्रकृतयोर्वा एकधर्मान्वयित्वं तुल्ययोगित्वम्।

विश्रान्तिं कामयन्ते रजनिरिति धिया भूतले सर्वलोकाः,
कोकाः क्रन्दन्ति शोकानलविकलतया किञ्च नन्दन्त्युलूकाः॥

इत्यत्र धूलिजालरूपस्य एकस्य वस्तुनोऽनेकैर्ग्रहीतृभिरेकप्रकारेण रजनीत्वेन ग्रहणमिति तत्रातिव्याप्तिवारणाय नानाप्रकारकमिति। ग्रहणमिति ग्रहणसमुदायो विवक्षितः। अनेकग्रहीतृकस्य एकस्य ग्रहणस्याप्रसिद्धेः निमित्तवशादिति तु वस्तुकथनमात्रम्।

"नरैर्वरगतिप्रदेत्यथ सुरैस्स्वकीयापगेत्युदारतरसिद्धिदेत्यखिलसिद्धसंघैरपि।
हरेस्तनुरिति श्रिता मुनिभिरस्तसङ्गैरियं तनोतु माम् शंतनोस्सपदि शन्तनोरङ्गना॥"

इत्युदाहरणम्। इति उल्लेखप्रकरणम् ॥

॥ अथ अपह्नुत्यलङ्कारः ॥

उपमेयतावच्छेदकनिषेधसामानाधिकरण्येनारोप्यमाण मुपमानतादात्म्यम पह्नुतिः। रूपकवारणाय तृतीयान्तं स्मितं "नैतत् किं तु प्रकृतिरमणीयं विकसितमित्याद्युदाहरणम्॥ अप्पय्यदीक्षितैः पर्यस्तापह्नुतिरूपापह्नुति-विशेषस्य "नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखमि"त्युदाहरणमुक्तम्। तन्न । प्रकृतं या निषिध्यान्यत्साध्यते सापह्नुतिः। उपमेयमसत्यं कृत्वा उपमानं सत्यतयोपस्थाप्यते। साप्यपह्नुतिरिति काव्यप्रकाशोक्तापह्नुति-सामान्यलक्षणानाक्रान्तत्वात्। प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनं सा स्यादपह्नुतिरिति तैरेव चित्रमीमांसोक्तं यदपह्नुति सामान्यलक्षणं तदनाक्रान्तत्वाच्च तस्मान्नायं सुधांशुरित्येतत् दृढारोपरूपकमेव, नापह्नुतिः। उपमानतादात्म्योपमेयतावच्छेदकयोस्समानाधिकरण्यप्रतीतेः।

॥ इति अपह्नुतिप्रकरणम् ॥

॥ अथ उत्प्रेक्षाप्रकरणम् ॥

तद्भिन्नत्वेन प्रमितस्य पदार्थस्य रमणीयतावृत्तिधर्मसंबन्धनिमित्तकं यत्तत्वेन संभावनं तदभाववत्वेन प्रमितस्य पदार्थस्य रमणीय तत्समानाधिकरण धर्मसंबन्धनिमित्तकं यत् तद्वत्वेन संभावनं तयोरन्यतरदुत्प्रेक्षा। तादात्म्य

निरुपिताधेयत्वं वस्तु प्रतिवस्तु भावापन्नत्वं अनुपदं वक्ष्यमाणविस्तारप्रकटनयो: प्रसिद्धम्।

आननं मृगशाबाक्ष्या: वीक्ष्य लोलाळकावृतम्।
भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम्॥

इत्यत्र स्मरणालङ्कारेऽतिव्याप्तिवारणाय वाक्यार्थेति।

आपद्गत: खलु महाशयचक्रवृत्त विस्तारयत्यकृतगर्वमुदारभावम्।
कालागरुद्दहनमध्यगतस्समन्ताल्लोकोत्तरं परिमळं प्रकटीकरोति॥

इत्युदाहरणम्। अत्र विस्तारप्रकटने वस्तुनो एकरूप्येण संमते॥

इति प्रतिवस्तूपमाप्रकरणम्॥

॥ अथ निदर्शनालङ्कार: ॥

उपात्तयोरर्थयोरार्थभेदौपम्यपर्यवसानं निदर्शना। अतिशयोक्तिवारणाय उपात्तयोरिति वाच्यरूपकवारणायार्थ इति।

अन्यैस्समानममरैर्जगदन्तरात्मन् यं रावणान्तकमिति वदन्ति भवन्तमज्ञा:।
ते किं न हन्त तुलयन्ति नभो निरन्तं वातायनोदरगतै: विविधान्तरालै:॥

इति निदर्शना प्रकरणम् ॥

॥ अथ व्यतिरेकालङ्कार: ॥

उपमानादुपमेयस्य गुणविशेषवत्वेन उत्कर्ष: व्यतिरेक:। प्रतीपवारणाय तृतीयान्तम्।

कथमिन्दुरिवाननं त्वदीयं सकलङ्क स्सकलङ्कहीनमेतत्। इत्युदाहरणय्॥

इति व्यतिरेकप्रकरणम्

॥ अथ सहोक्तिरलङ्कार: ॥

प्रिये विषादं जहिहीति वाचं प्रिये सरागं वदति प्रियायाः।
वारामुदारा विजगालयाराविलोचनाभ्यां मनसश्च मानः॥

इत्युदाहरणम्। अत्र प्रियायावर्ण्यत्वात् तदीयत्वेन प्रकृतयोधार्यामानयोर्वलनक्रिया समानधर्मत्वेनोपात्ता। यत्तु अप्पय्यदीक्षितैः

हिताहितेवृत्तितौल्यमपरा तुल्ययोगिता॥

प्रदीयते पराभूतिर्मित्रशात्रवयोस्समेत्यादिना तुल्ययोगिताया प्रकारान्तरमुक्तमुदाहृतं लक्षितं च, तन्न। वर्ण्यानामितरेषां वा धर्मैक्य तुल्ययोगितेति तदुक्त प्रथमलक्षणाक्रान्तत्वेनोक्तोदाहरणस्य एतल्लक्षणलक्ष्यत्वासम्भवात्।

इति तुल्ययोगिताप्रकरणम् ॥

॥ अथ दीपकालङ्कारः ॥

प्रकृताप्रकृतानां एकसाधारणधर्मान्वयः दीपकम्। तत्रौपम्यस्य गम्यत्वं प्रकृतार्थमुपात्तो धर्मः अप्रकृतमपि दीपयति प्रकाशयति सुन्दरीकरोतीति दीपकम्।

सुधायाश्चन्द्रिकायाश्च संजीविन्या महौषधेः।
दयादृष्टेश्च ते राजन् विश्वसंजीवनं गुणः ॥

मृतस्य लिप्सा कृपणस्य दित्स। विमार्गगायाश्च रुचिः स्वकान्ते।
सर्पस्य शान्तिः कुटिलस्य मैत्री विधातृसृष्टौ न हि दृष्टपूर्वा ॥

इत्युदाहरणम् । पूर्वत्र भावस्साधारणधर्मः। उत्तरत्राभाव इति विशेषः॥

इति दीपकप्रकरणम् ॥

॥ अथ प्रतिवस्तूपमाप्रकरणम् ॥

वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकवाक्यार्थयोरार्थिकमौपम्यं प्रति वस्तूपमा। केनचिद्रूपेणापन्नं ययोः यत्सादृश्यं तेन रूपेण तयोः अन्यवस्तुद्वयादि

कर्मकविकासानुकूलव्यापारे प्रस्तुत सूर्यनिष्ठे हस्तस्पर्शकरणकनायिका विशेषकर्मकानुनयनानुकूला प्रस्तुतनायकव्यापारत्वाध्यवसायः। पृथक्च्छब्दानुपादानाद्रूपकाद्वैलक्षण्यम्॥

॥ इति समासोक्तिप्रकरणम् ॥

॥ अथ परिकारालङ्कारः ॥

विशेषणानां साभिप्रायत्वं परिकरः । तच्च प्रकृतार्थोपपादक-चमत्कारिब्यङ्ग्यकत्वम्। अत एवास्य हेत्वलङ्काराद्वैलक्षण्यम्। हेत्वलङ्कारे व्यङ्ग्यस्यानावश्यकत्वात् उपपादकता च उपपादकनिष्पादकसाधारणी-व्यङ्ग्यस्य गुणत्वाच्च न ध्वनित्वं व्यपदिश्यते।

''शशांककलितोत्तंकसस्तापं हरतु वश्शिवः।'' इत्युदाहरणम्। शशांककलि-कोत्तंस इति विशेषणस्य तापनिवारणसामर्थ्यशैत्यविशेषसंबन्धव्यञ्जकत्वं स्पष्टम्॥

इति परिकरप्रकरणम् ॥

॥ अथ श्लेषालङ्कारः ॥

एकया श्रुत्या अनेकार्थप्रतिपादनं श्लेषः। तच्च द्वेधा। अनेकधर्मपुरस्कारेण एकधर्मपुरस्कारेण च। आद्यं द्वेधा। अनेकशब्दप्रतिभानद्वारा एकशब्दप्रति-भानद्वारा चेति। तथा च त्रिविधश्श्लेषः। तत्राद्यस्सभङ्गः द्वितीयो ह्यभङ्ग इति व्यवह्रियते। तृतीयश्शुद्ध इति व्यवह्रियते। त्रिविधोऽपि श्लेषः प्रकृतमात्राप्रकृतमात्रप्रकृताप्रकृतोभयमात्राश्रितत्वेन त्रिविधः।

''संभूत्यर्थं सकलजगतोविष्णुनाभिप्रपन्नम्।''

इति सभंगश्लेषोदाहरणम्। भगवन्नाभीकमलक्ष्म्योः द्वयोर्विष्णुना-भिप्रपन्नमिति एकेन शब्दश्रवणेनविष्णुनाभिप्रपन्नमिति एकशब्द भावनद्वारा नाभिपद्मस्य विष्णुनाभिप्रपन्नमिति पदद्वयप्रतिभानद्वारा लक्ष्मी वस्तुनश्च प्रतिपादनात्। विष्णुनाभिप्रपन्नमित्यस्य पद्मत्वे एकपदत्वेन स्थितस्य विष्णुना अभिपन्नमिति पदद्वयरूपेण भञ्जनात् सभङ्गत्त्वम्। निजसेवितजाड्यहरणो

गुणप्रधानभावावच्छिन्न सहार्थसंबन्धः सहोक्तिः।

"केशैर्वधूनामथ सर्वकोशैः प्राणैश्च साकं प्रतिभूपतीनां। त्वया रणे निष्करुणेन राजन्चापस्य जीवा चकृषे जवेन॥"

इत्युदाहरणम्। अनुकूलभावमथवा पराङ्मुखत्वमेतत्सहैवेत्यत्राति-प्रसङ्गवारणायावच्छिन्नान्तम्। पुत्रेण सहागच्छति पितेति वाक्येऽ-तिव्याप्तिवारणाय सहृद्यत्वविशेषणं देयम्। "सह युक्तेऽप्रधाने" इति सूत्रात् तृतीयान्तार्थस्य गुणत्वं प्रथमान्तार्थस्य प्राधान्यं आख्यातसामानाधिकरण्य-बलादवगम्यते इति गुणप्रधानभावावच्छिन्नत्वं सहार्थस्याविरुद्धम्॥

इति सहोक्तिप्रकरणम्॥

॥ अथ विनोक्तिः॥

हृद्यत्वे सति विनार्थसंबन्धो विनोक्तिः। देवदंत्त विना गतो यज्ञदत्त इति वाक्ये अतिव्याप्तिवारणाय सत्यन्तम्।

"संपदासंपरिष्कृत्तो विद्याया चानव।
नरो न शोभते लोके हरिभक्तिरसंविना॥" इत्युदाहरणम्॥

इति विनोक्तिप्रकरणम्

॥ अथ समासोक्तिः॥

साधरणविशेषणमात्रश्रुत्युपस्थापिता प्रस्तुत धर्मिक व्यवहाराभिन्नत्वेन भासमानः प्रस्तुत धर्मिक व्यवहारस्समोक्तिः। शब्दशक्तिमूलध्वनिवारणाय मात्रेति। तत्र विशेष्यस्यापि शिष्टातया प्रस्तुतेतरधर्म्युपस्थानद्वारा तादृशधर्मिकव्यवहारोपस्थापकत्वात्। प्रस्तुतधर्मिकप्रस्तुताप्रस्तुतव्यवहार-विषयके श्लेषेऽपिव्याप्तिवारणाय प्रस्तुताप्रस्तुतत्वे धर्मिविशेषणतयोपात्ते।

बोधयन्करसंस्पर्शैः पद्मिनीं मुदिताननाम्।
परिपूर्णानुरागेण प्रातर्जयति भास्करः॥

इत्युदाहरणम्। अत्र विशेषण महिम्ना किरणस्पर्शकरणकमुकुळितपद्मिनी

इत्युदाहरणम्। अत्र गगनाम्बर इति सूर्याचन्द्ररज्यमानवस्त्र इत्याकारेण भस्मांगराग इति अग्निसृज्यमानांगराग इत्याकारेण च निरूपित:॥

॥ इति पर्यायोक्तिप्रकरणम् ॥

॥ अथ व्याजस्तुति: ॥

निन्दाया: पर्यवसन्नया निन्दया स्तुतौ पर्यवसानं स्तुतावपर्यवसन्नया स्तुत्या निन्दायां पर्यवसानं च व्याजस्तुति:। तत्पुरुषकर्मधारयाभ्यां योगार्थद्वयेन द्वयोरपि व्याजस्तुतिशब्दलभ्यत्वात्। "उर्वीं शासति मय्युपद्रवलव: कस्यापि न स्यादिति प्रौढं व्याहरतो वचस्तव कथं देव प्रतीमो वयम्। प्रत्यक्षं भवतो विपक्षनिवहैर्धामुत्पतद्भि: क्रुधा, यद्युष्मत्कुलकोटिमूलपुरुषो निर्भिद्यते भास्कर:॥" इत्याद्या उदाहरणम्। अत्र राजवर्णनप्रस्तावे निन्दाबाधिता स्तुतौ पर्यवस्यति।

किमहं वदामि खलदिव्यमते गुण पक्षपातमभितो भवत: गुणशालितो निखिल साधुजनान् यदहर्निशं न खलु विस्मरसि। इति द्वितीयाया उदाहरणम्। अत्र दुश्चरित्रोत्कीर्तन प्रस्तावे स्तुतिर्बाधिता निन्दायां पर्यवस्यति॥

इति व्याजस्तुतिप्रकरणम्॥

॥ अथ आक्षेप: ॥

चमत्कारित्वे सति निषेध आक्षेप:। घटो नास्तीत्यस्य वारणाय सत्यन्तम्। उपमालङ्कारादिवारणाय विशेष्यम्। अत्र उपमेयस्य उपमान सबन्धिसकलप्रयोजननिष्पादना क्षमत्वादुपमानकैमर्थ्यमुपमानाधिक्षेप रुपमाक्षेप: इत्युक्तस्याक्षेपस्य पूर्वोपन्यस्तस्यार्थस्य पक्षान्तरालम्बनप्रयुक्तो निषेध आक्षेप इत्युक्तस्य आक्षेपस्य व्यङ्ग्यरूपमर्थ विशेषं वक्तुं विवक्षितस्य प्रकृतार्थस्य निषेधसदृश: कथनादिप्रत्याख्यानरूप: आक्षेप इत्युक्तस्याक्षेपस्य च निषेधपदेन सङ्ग्रह:। "वसुधाविलयपुरन्दर विलसति भवत: कराम्भोजे। चिन्तामणि कल्पद्रुमकामगवीभि: कृतं जगति॥ इति प्रथमस्य उदाहरणम्॥

किं निश्शंकं शेषे शेषे वयसि त्वमागतो मृत्यु:।

अथवासुखं शयीथा: जननी जागर्ति जाह्नवीनिकटे॥

विष्णुस्सूर्यश्च वः पायात्। इत्यभङ्गश्लेषोदाहरणम्। जाड्यहरणपदस्य विभागं विनैव विष्णुसूर्यगतविलक्षणधर्मद्वय प्रतिपादकत्वात्।

अर्जुनस्य गुरुर्माया मनुजः परमः पुमान्।
गुञ्जापुञ्जाधकरः पायात् पायादिह कोऽपि वः॥

इति शुद्धोदाहरणम्। अत्र चार्जुनगुरुत्वपुरूषत्व गुञ्जापुञ्जाधरत्व माया मनुजत्वादिना गोपकिरातशेषयोः भगवतोर्हरिहरयोः प्रतिपादनात्।

इति श्लेषप्रकरणम् ॥

अथ अप्रस्तुतप्रशंसाऽलङ्कारः ॥

अप्रस्तुतेन व्यवहारेण सादृश्यादिवक्ष्यमाणप्रकारान्यतमप्रकारेण प्रस्तुत व्यवहारो यत्र प्रशस्यते साऽप्रस्तुतप्रशंसा। प्रशंसनं च वर्णनमात्रं न तु स्मृतिः। "धिक्तालस्योन्नतां यस्य छायाविनोपकाराये"त्यादावव्याप्त्यापत्तेः। इयं च पञ्चधा। अप्रस्तुतेन स्वसदृशं प्रस्तुतं यस्यां प्रशंसायां गम्यते सा प्रथमा। कार्येण कारणमिति द्वितीया। कारणेन कार्यमिति तृतीया। सामान्येन विशेष इति चतुर्थी। विशेषेण सामान्यमिति पञ्चमी। "पुरा सरसि मानसे विकचसारसालिस्खलत्परागसुरभीकृते पयसि यस्य यातं वयः। स पल्वलजलेऽधुनामिळदनेकभेकाकुले, मराळकुलनायकः कथय रे कथं वर्तताम्॥"

इति प्रथमाया उदाहरणम्। द्वितीयाद्युदाहरणानि तत्र तत्र द्रष्टव्यानि॥

इति अप्रस्तुतप्रशंसाप्रकरणम्॥

॥ अथ पर्यायोक्तिः ॥

विवक्षितस्यार्थस्य भङ्ग्यन्तरेण प्रतिपादनं पर्यायोक्तम्। येन रूपेण विवक्षितार्थस्तदतिरिक्तप्रकारो भङ्ग्यन्तरं आक्षेपो वा।

सूर्याचन्द्रमसौ यस्य वासोरत्नयतः करैः।
अंगरागं सृजत्यग्निस्तं वन्दे परमेश्वरम्॥

इति विशेषोक्ति प्रकरणम्॥

॥ अथ असङ्गत्यलङ्कारः ॥

विरुद्धत्वेनापाततो भासमानं हेतुक कार्ययोर्वैयधिकरण्यमसङ्गतिः।

स्पृशति त्वयि यदि चापं स्वापं प्रापं न केवलं नरपालाः।
शोणे तु नयनकोणे बालेन्दु तव मुखं स्ववर्त॥

इत्यत्र चापस्पर्शनयनशोणिम्नोः हेत्वोः स्वापनाशरूपकार्य वैयधिकरण्येऽतिप्रसंगवारणाय विरुद्धेत्यादि। इह तु विभिन्नदेशस्थयोरेव तयोः कार्यप्रयोजकतया विरोधानवकाशात्।

"दृष्टिर्मृगीदृशोत्यन्तं श्रुत्यन्तपरिशीलिनी। मृच्यन्ते बन्धनात्केशाः विचित्रा वैधसीगतिः॥"

इत्युदाहरणम्,

इति असङ्गतिप्रकरणम्॥

॥ अथ विषमालङ्कारः ॥

अननुरुपसंसर्गो विषमालङ्कारः॥

दूरिकर्तुं प्रियं बाला पद्मेनाताडयद्रुषा।
स बाणेन हतस्तेन तामाशु परिषस्वजे॥

इत्युदाहरणम्। अत्र प्रियदूरीकरणरूपेष्टार्थे प्रयुक्तेन पद्मताडनेन कारणेन प्रियदूरीकरणं न जातम्। प्रत्युत तदाश्लेषणमिति कारणस्य नभीष्टकार्य जनकत्वरूपस्संबन्धः अननुरूपः॥

इति विषमालङ्कारप्रकरणम्॥

॥ अथ समालङ्कारः ॥

अनुरूपस्संसर्गस्समालङ्काः॥

मन्त्रार्पितहविर्दग्धहुताशनतनूभुवः।
शिखास्पर्शेन पाञ्चाल्याः स्थाने दग्धस्सुयोधन॥

इत्युदाहरणम्॥ पाञ्चालीशिखास्पर्शस्य स्पर्शन कर्तुदुर्योधनदा-जनकत्वसंसर्ग अनुरूपः पाञ्चाल्या अग्निसमुद्भूतत्वे नाग्निमयत्वात्।

इति द्वितीयस्योदाहरणम्।

वासोऽनुमानवेद्यश्शीतान्यङ्गानि निश्चलाः दृष्टिः।
तस्यास्सुभगकथेयं तिष्ठतु तावत्कथान्तरं कथय॥

इति तृतीयस्योदाहरणम्।
इति आक्षेपप्रकरणम्॥

॥ अथ विरोधाभासः ॥

विरोधशून्ये विरोधभानं विरोधाभासः।
त्वयि दृष्टे त्वया दृष्टे भवन्ति जगतीतले॥
महान्तोऽप्यणवो राजन् अणवोऽपि महत्तरा॥

इत्युदाहरणम्॥

इति विरोधाभासप्रकरणम्॥

॥ अथ विभावनाऽलङ्कारः ॥

कारणव्यतिरेक सामानाधिकरण्येन प्रतिपाद्यमाना कार्योत्पत्तिः विभावना।

विनैवशस्त्रं हृदयानि यूनां
विवेकभाजामपि दारयन्त्यः।
अनल्पमायामयवल्गुलीला'
जयन्ति नीलाम्बुदलायाताक्ष्या॥

इत्युदाहरणम्॥

इति विभावनाप्रकरणम्॥

॥ अथ विशेषोक्तिः ॥

प्रसिद्ध कारणकलापसामानाधिकरण्येन वर्ण्यमाना कार्यानुत्पत्तिः विशेषोक्तिः।

"उपनिषदः परिगीताः गीतापि च हन्त श्रुतिपथं नीता।"
"तदपि न हा विधुवदनामानससदनाद्बहिर्याति॥" इत्युदाहरणम्॥

विशेषः। युगपदिति विशेषणात् पर्यायेनातिव्याप्तिः। यच्च किञ्चित्कार्यमारभमाणस्यासंभाविताशक्यवस्त्वन्तरनिर्वतनं स तृतीयो विशेषः। एतत्त्रितयान्यतमत्वं विशेषालङ्कारसामान्यलक्षणम्॥

अये राजन्नाकर्णय कुतुकमाकर्णनयन।
त्वदाधाराकीर्तिर्वसति किल मौलौ दशदिशाम्॥
त्वदेकालम्बोऽयं गुणगणकदंबो गुणनिधे
मुखेषु प्रौढानां विलसति कवीनामविरतम्॥ इत्यादीन्युदाहरणानि॥

इति विशेषप्रकरणम्॥

॥ अथ व्याघातालङ्कारः ॥

एकेन कर्त्रैकेन कारणेन कार्यं किंचिन्निष्पादितं निष्पादयिषितं वा तदन्येन कर्त्रा तेनैव कारणेन तद्विरुद्धकार्यस्य निष्पादनेन निष्पिपादयिषया वा व्याहन्यते स व्याघातः।

दिनद्रुमान्वचोभिः खलनिकरैरनुदिनं दलितान्।
पल्लवयन्त्युल्लसितान् नित्यं तैरेव सज्जनधुरीणाः॥
इत्याद्युदाहरणम्॥

इति व्याघातप्रकरणम्

॥ अथ श्रृंखलालङ्कारः ॥

पङ्क्तिरूपेण निबद्धार्थानां पूर्वस्य पूर्वस्य उत्तरोत्तरस्मिन् उत्तरोत्तरस्य वा पूर्वपूर्वस्मिन् संसृष्टत्वं श्रृखलालङ्कारः। तच्च संसृष्टत्वं कार्यकारणविशेषणविशेष्यत्वादि नानाविधम्। पङ्क्तिरूपार्थानां कार्यकारणभावे उक्तश्रृङ्खला कारणमालेत्युच्यते। तत्र पूर्वं पूर्वं कारणं परं परं कार्यमिति एका कारणमाला।

पूर्वं पूर्वं कार्यं परं परं कारणमित्यपरा।
लभेत पुण्यैर्गृहणीमनोज्ञा तया सुपुत्राः परितः पवित्राः॥
स्फीतं यशस्तैस्समुदेति नूनम्।
तेनास्य नित्यः खलु नाकलोकः॥

इति समालङ्कारप्रकरणम्॥

॥ अथ विचित्रालङ्कारः ॥

इष्टसिद्ध्यर्थमिष्टेषिणा क्रियमाणमिष्टविपरीताचरणं विचित्रालङ्कारः॥

''बन्धोन्मुक्त्यै खलु मख मुखान् कुर्वते कर्मपाशान्॥'' इत्युदाहरणम्। कर्मणां मुक्तिविपरीतफलत्वात्॥

इति विचित्रप्रकरणम्॥

॥ अथ अधिकालङ्कारः॥

आधाराधेययोरन्यतरस्यातिविस्तृतत्वसिद्धिफलकमितरस्यातिन्यूनत्वकल्पन मधिकालङ्कारः।

''लोकानां विपदं धुनोषि तनुषे संपत्तिमत्युत्कटा
मित्यल्पे तरजल्पितैर्जलधियां भूपालमागामदम्।
यत्कीर्तिस्तववल्यभा लधुतरब्रह्माण्डसंधोदरे।
पिण्डीकृत्यमहेशतामपि तनुं कष्टेन हा वर्तते॥''

इत्युदाहरणम्

इति अधिकप्रकरणम्

॥ अथ अन्योन्यालङ्कारः ॥

द्वयोरन्योऽन्येन अन्योन्यस्य विशेषाधानं अन्योन्यालङ्कारः॥

सदृशोजितरत्नजालया
सुरतान्तश्रमबिन्दुमालया।
अधिकेन च हेमकान्तिना
विधये कापि रुचिः परस्परम्॥

इत्युदाहरणम्।

इति अन्योन्यप्रकरणम्॥

॥ अथ विशेष प्रकरणम् ॥

प्रसिद्धमाश्रयं विनाधेयं वर्ण्यमानं एको विशेषः। यच्च एकमाधेयं परिमितं यत्किंचिदाधारगतमपि युगपदनेकाधारगततया वर्ण्यते सोऽपरो

इति सारप्रकरणम्

॥ अथ काव्यलिङ्गालङ्कार: ॥

अनुमितिकरणत्वेन सामान्य विशेषाभ्यां वा नालिङ्गित: प्रकृतार्थोपपादकत्वेन विवक्षितोऽर्थ: काव्यलिङ्गम्॥ उपपादकत्वं च तन्निश्चयजनकज्ञानविषयत्वम्। अनुमानार्थान्तरयोर्वारणाय नालिंगितान्तम्। उपमावारणायोपपादकत्वेनेत्यन्त भयानकत्वात्परिवर्जनीयोदयाश्रयत्वादसि देवसेव्य: इत्यत्र पञ्चम्यादिशब्दप्रतिपादितहेतुत्वकस्य हेतोर्वारणाय उपपादकत्वेन विवक्षित इति विवक्षित:। गम्यमान इत्यर्थ:। गम्यमानहेतुत्वकस्यैव हेतोस्सुन्दरत्वेनालङ्कारिकै: काव्यलिङ्गत्वाभ्युपगमात्। तच्च सुबन्ततिङन्तत्वाभ्यां द्विविधम्। आद्यं शब्दान्तरार्थ विशेषितशरीम्। शुद्धैक सुबन्तार्थं चेति द्विविधम्। साक्षात्परम्परया वाक्यार्थविशेषितं सुबन्तार्थमात्रविशेषितं चेति द्विविधं तिङन्तार्थभूतमपि साक्षात्परम्परया वाक्यार्थविशेषितं सुबन्तार्थमात्रविशेषितं चेति द्विप्रकरणम्। शुद्धभेदस्तु तिङन्तार्थस्य न संभवति क्रियाया: कारकविशेषितत्वावश्यंभावात्। "विनिद्रात्मन्युन्मत्तैरपि च परिहार्याणि पतितै स्वाचानि त्वामैस्सपुळ कमपास्यानि पिशुनै:। हरन्ती लोकानामनवरतमेनांसि कियतां कदाप्य श्रान्तात्वं जगति पुरीका विजयसे॥" इत्युदाहरणे अनन्यसाधारणतया प्रतिपादितस्य भागीरथ्या उत्कर्षस्य उपपादनाय सकल लोकपापहरणकालीनश्रमा भावस्सुबन्तार्थमात्रविशेषित: सुबन्तार्थो हेतुत्वेन उपात्त:।

"आपन्ने तीर्थानि त्वरितमिह यस्योच्छृति विधौ करं कर्णे कुर्वन्त्यपिकलिकपालिप्रभृतय:। इमं तं मां तत्वमथ करुणाकान्तहृदये पुनाना सर्वेषामघमथनदर्पंदलयसि" इत्युदाहरणे सकलतीर्थदर्पदनसिद्धये स्वात्मपवित्रीकरनिबद्धम्। तच्च क्षुद्रत्वात्तादृश सिद्ध्यसमर्थं विशेषकान्तरमाकाङ्क्षतीति तीर्थकर्तृकत्रपाकरणं कपालिप्रभृति कर्तृककर्ण मुद्राकरणं चेति वाक्यार्थद्वयं स्वात्मरूपकर्मद्वारा विशेषकमुपात्तम्। तद्विशिष्टं च तादृश पवित्रीकरणं भगीरथ्युपारूढं तादृशकार्योपपादनसमर्थमिति भवति हेतु:।

स्वर्गापवर्गौ खलु दानलक्ष्मी
दानं प्रसूते विपुला स्मृद्धिः।
''समृद्धिमल्पेतरभागधेयं।
भाग्यं च विष्णो तव पादभक्तिः॥

इत्याद्युदाहरणम्,

॥ इति कारणमाला प्रकरणम् ॥

॥ एकावलीप्रकरणम् ॥

सैव शृङ्खला संसृष्टस्य विशेष्यविशेषणभावत्वेन एकावलीत्युच्यते। सा च पूर्वपूर्वस्योत्तरोत्तर प्रति विशेष्यत्वे विशेषणत्वे चेति द्विधा। उत्तरोत्तरविशेषणस्य स्थापकत्वापोहकत्वाभ्यामाद्या द्विधा। स्थापकत्वं स्वसंबन्धेन विशेष्यतावच्छेदकस्थापकत्वम्। स्वस्य व्यतिरेकेण विशेष्यतावच्छेदकव्यतिरेकबुद्धिजनकत्वमपोहकत्वम्।

स पण्डितो यस्स्वहितार्थदर्शी।
हितं च तद्यत्र परा नवक्रिया।
परे च ते ये श्रितसाधुभावाः।
न साधुता सा न हि यत्र माधव॥

इत्युदाहरणे पूर्व पूर्वस्य उत्तरोत्तरमपोहकम्।

धर्मेण बुद्धिस्तव देव शुद्धा
बुद्धया निबद्धा सहसैव लक्ष्मीः।
लक्ष्म्या च तुष्टा भुवि सर्वलोकाः
लोकैश्च नीता भुवनेषु कीर्तिः॥

इत्युदाहरणे पूर्वेण पूर्वेण स्वव्यवहितं उत्तरोत्तरं विशेष्यत॥

इति एकावली प्रकरणम्॥

अथ सारालङ्कारप्रकरणम्।

सैव संसृष्टस्य उत्कृष्टापकृष्ट भावरुपत्वे सारालङ्कारः
संसारे चेतनास्तत्र विद्वांसस्तेषु साधवः।
साधुष्वापि स्पृहाहीनास्तेषु धन्या निराशया॥
इत्युदाहरणम्॥

इति काव्यलिङ्गप्रकरणम्॥

॥ अथ अर्थान्तरन्यासालङ्कारः ॥

सामान्येनविशेषस्य, विशेषेणसामान्यस्य वा समर्थनं अर्थान्तरन्यासालङ्कारः। समर्थनं च इदमेवमनेवं स्यादिति संशयस्य प्रतिबन्धकः इत्थमेवेति निश्चयप्रत्ययः।

करिकुम्भतुलामुरोजयोः।
क्रियमाणां कविभिर्विश्टङ्खलैः।
कथमालि श्रृणोषि सादरं।
विपरीत ग्रहणा हि योषितः॥

इत्युदाहरणम्॥ अत्र संबोध्यकर्तृकतदीयकुचवृत्तिकरिकलभतुलासादर श्रवणस्यानौचित्यं प्रतिपाद्यते। तच्च भ्रान्तिमत्वं विना दुरुपपादमिति स्त्रीत्वेन भ्रान्तिमत्वं प्रतिपाद्यते। तच्च संबोध्यस्त्रीविशेषगतभ्रान्तिमत्वस्य विशेषस्य सामान्यं समर्थकम्।

उपकारमेव कुरुते विपद्गतस्सद्गुणो नितराम्।
मूर्च्छांगतो मृतो वा रोगानपहरति पारदस्सकलान्॥
इत्युदाहरणम्। अत्र संबोध्यकर्तृक विपद्गतसद्गुणकर्तृकोपकारस्य सामान्यस्य प्रकृतस्य मूर्च्छितमृतपारदकर्तृकरोगापहरणाविशेषः समर्थकम्॥

इति अर्थान्तरन्यासप्रकरणम्॥

॥ अथ अनुमानालङ्कारः ॥

व्याप्तिपक्षधर्मताविशिष्टहेतुश्चमत्कारी अनुमानालङ्कारः। व्याप्तिपक्षधर्मता विशिष्टो हेतुरिति वाक्येऽतिव्याप्तिवारणाय चमत्कारीति। यत्त्वं नेत्रेति पूर्वं निरूपितार्थश्लोक उदाहरणम्॥

इति अनुमानप्रकरणम्

॥ अथ यथासंङ्ख्यालङ्कारः ॥

''पद्मासन प्रमुखनिर्जरचित्तवृत्तिदुष्प्रापदिव्यमहिमन्भवतोगुणौधान्।
तुष्टूषुतो मम नितान्त विश्रृङ्खलस्य मन्तुं शिशोश्शिव न मन्तुमिहासि योग्य:॥
इत्युदाहरणे शिशुत्वं शुद्धैक सुबन्तार्थो अपराधक्षमाकरणहेतु: तादृशास्तवे च विश्रृङ्गत्वं हेतु: इति शुद्ध सुबन्तार्थस्य विशिष्टसुबन्तार्थस्य चोदाहरणत्वम्

तवालंबादम्ब स्फुरदलधुगर्वेण सहसा।
मया सर्वेऽवज्ञा पुरमथनमनीयन्त विबुधा:।
इदानीमौदास्यं यदि भजसि भागीरथि तदा,
निराधारो हारो दिमि कथय केषामिह पुन:॥

इत्युदाहरणे निराधारा इत्यादिनाऽभिव्यक्ते वक्त्रनिष्ठसकलकर्तृकद्वेषे अस्मत्कर्तृकावज्ञापुरमथन नयनरूपस्सुबन्तार्थविशेषितस्तिडन्तार्थ उपपादक:। यत्तूक्तं कुवलयानन्दकर्तृभि: समर्थनीन्ववनि: तथा दिव्यं महित्वं अचिन्त्यमाहात्म्यं सुबन्तार्थविशेषितसुबन्तार्थरूपं ब्रह्मादिचित्तदुष्प्रापत्वे हेतु:। एवं तादृशभगवद्गुणकर्मकस्तवो मुक्तौ हेतु:। यस्यार्थस्य काव्यलिङ्गं समर्थनमिति तन्न। अर्थान्तरन्यासे सामान्येन विशेषस्य विशेषेण सामान्यस्य वा समर्थनरूपेऽतिव्यामे:। सामान्य विशेष भावानालिंगितत्व विशेषणस्य तैरदत्तत्वात्। यत्तु

यत्वं नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरित: प्रिये तव मुखच्छायानुकारी शशी।
येऽपित्वद्गमनानुसारिगतयस्ते राजहंसा गता:
त्वत्साद‍ृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥

इत्यत्र पादत्रयार्थोऽनेक वाक्यार्थरूपश्चतुर्थ पादार्थे हेतु:। अत: काव्यलिङ्गत्वमिति अलङ्कारसर्वस्वकृत्क वलयानन्दकृद्भ्यामुक्तम्। तन्न। उक्तश्लोकस्यानुमानालङ्कारमात्रविषयत्वात्। चतुर्थचरणे दैवरुपे पक्षे नायिकाङ्ग साद‍ृश्यजन्यसुखासहिष्णुत्वरूपसाध्यस्य चरणत्रयवेद्येन तत्तदङ्गसाद‍ृश्याधारविघटकत्वेन हेतुतासिद्धे:। स्फुटतया अस्फुटहेतुता सिद्धिककाव्यलिङ्गत्वासम् भवात् दैवं नायिकाङ्गसाद‍ृश्यदर्शन जन्यमन्निष्ठ सुखासहिष्णु तत्तन्नायिकाङ्गसाद‍ृश्यार्थविघटकत्वात्। मदीयशत्रु भूतयज्ञदत्तादिवदिति प्रयोग:॥

इति परिवृत्तिप्रकरणम्॥

॥ अथ परिसङ्ख्यालङ्कारः ॥

सामान्यतः प्राप्तस्यार्थस्य कस्मिंश्चिद्विशेषाद्व्यावृत्तिः परिसङ्ख्यालङ्काकारः। परिसंख्या शुद्धा प्रश्नपूर्विका चेति द्विधा। द्विविधाप्यार्थी शाब्दी चेति चतुर्धा। सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिस्सेव्यताम्। चिन्तायामपि सस्पृहयदि चिरा चक्रायुधश्चिन्त्यताम्।

आलापं यदि काङ्क्षसे मधुरिपोर्गाथाम् तदालप्यतां
स्वापं वाञ्छसि चेन्निरर्गलसुखे चेतस्सुखं सुप्यताम्॥

इत्युदाहरणे यदि घटितवाक्यैः निवेदितस्य रागप्राप्तस्य सेवादेः श्रीहरौ विषयान्तरे च प्राप्तत्वेनाऽर्थघटितवैयर्थ्यप्रसंङ्गात्। विषयान्तरं न सेव्यतामित्यादि रूपाव्यावृत्तिः आर्थी शुद्धा च।

किं तीर्थं हरिपादपद्मभजनं किं रत्नमर्चामतिः
किं शास्त्रं श्रवणेन यस्य गळति द्वैताब्जकारोत्करः।
किं मित्रं सततोपकाररसिकस्तत्वावबोधस्सखे
कश्शत्रुर्वद खेददानकुशलो दुर्वासनासञ्चयः॥

अत्र हरिपादभजनादिकमेव तीर्थादिकं नान्यदिति व्यावृत्तिः
आर्थी प्रश्नपूर्विका च,

तीर्थं गंगा तदितरदपां निर्मलं संघमात्रं देवौ
तस्याः प्रसवनिलयौ नाकिनोऽन्येवराकाः।
सा यत्रास्ते सहि जनवदोमृत्तिकामात्रमन्यत्।
तां यो नित्यं नमति स बुधो बोध शून्यस्ततोऽन्यः॥

इत्युदाहरणे मात्रादि पदैस्तीर्थत्वादि व्यावृत्तिश्शाब्दी शुद्धा च।

किं मित्रमन्ते सुकृतं न लोकाः
किं च्छ्रेयमीशस्य पदं नतो काः।
किं काज्यमव्याजसुखं न भोगाः
किं जल्पनीयं हरिनाम नान्यत्॥
इत्युदाहरणे व्यावृत्तिश्शाब्दी पश्नपूर्विका च॥

उपदेशक्रमेणार्थानां संबन्धो यथासंख्या लंङ्कार:। "यौवनोद्गमनितान्तशंकिता: शीलशौर्य बलकान्ति लोभिता:। संकुचन्ति विकसन्ति राघवे जानकी नयननीरजश्रिय:॥" इत्युदाहरणम् अत्र यौवनोद्गमनितान्तशंङ्कितास्संकुचन्ति शीलशौर्यबलकान्ति लोभिता विकसन्तीति प्रथमद्वितीयक्रिययो: क्रमेण प्रथमद्वितीयक्रियावच्छिन्नेन कर्त्रा अन्वय:।

इति यथासंख्याप्रकरणम्॥

॥ अथ पर्यायालङ्कार: ॥

"क्रमेणानेकाधिकरणकमेकमाधेयं क्रमेणानेकाधेयकमेकमधिकरणं च पर्ययालङ्कार:।

मकरालयस्य कुक्षौ स्थित्वा सदनेऽमृताशिनां च चिरं संप्रति, निर्दोषि ते राजन्वदनाम्बुजे सुधावत्सति।

विदूरादाश्चर्यस्तिमितमथ किंचित्परिचयादुदञ्चाञ्चल्यं, तदनुपरितस्फारितरुचि॥

गुरूणां संघाते सपदि मयि याते समजनि कृपापूर्णक्षारं नयनयुगमिन्दीवरदृशः॥" इत्युदाहरणम्। क्वचिदनावृतस्थलविशेषे गुरुन् शिश्रूषमाणायाश्चिरप्रोषितमसंभावितागमनं प्रियमस्मादवलोकितवत्या: कस्याश्चिन्नयनरूपे एकस्मिन्नधिकरणे विशेषणभूतानां स्तिमितत्वादी नामाधेयानां सम्भवो द्वितीयोदाहरणे द्रष्टव्यम्। प्रथमं तु स्पष्टार्थम्॥

॥ इति पर्यायप्रकरणम्॥ ॥

॥ अथ परिवृत्यलङ्कार: ॥

परकीय यत्किंचिद्वस्त्वादानेन परस्मै स्वकीय यत्किंचिद्वस्तुसमर्पणं परिवृत्यलङ्कार:॥

अङ्गानि दत्वा हेमाङ्गि प्राणान् क्रीणासि चेन्नृणाम्।
युक्तमेतन्न तु पुनर्लोचनाम्बुरुहद्वयम्॥

इत्युदाहरणम्। अत्र पूर्वार्धे समपरिवृत्ति:। उत्तरार्धे विषमपरिवृत्ति:॥

अतिशयो यत्र सम्पद्यते स विषयः। समुच्चये तु एकं कार्यं संपादयितुं युगपदनेके खले कपोता इवाहमिहमिकया संपतन्ति। कार्यस्य च न कोऽप्यतिशय इति वैलक्षण्यात्॥

प्रादुर्भवति पयोदे कज्जलमलिनं बभूव न भः।

रक्तं च पथिक हृदयं कपोलपाली मृगीदृशः पाण्डुः॥

इत्युदाहरणम्।

इति समुच्चयप्रकरणम्॥

॥ अथ समाध्यलङ्कारः ॥

एककारणजन्यस्य कार्यस्याकस्मिककारणान्तरसमवधाना हितसौकर्यं समाध्यलङ्कारः।

आयातैव निशा मनो मृगदृशामुन्निद्रमातन्वती
मानो मे कथमेष संप्रति निशातङ्क हृदि स्थास्यति।
ऊहापोहमिमं सरोजनयना यावद्विधत्तेतरां
तावत्कामनृपालफालसुषमं बिम्बं बभासो विधोः॥

इत्युदाहरणम्। अत्र रात्रिसन्निधानादपि मानविनाशस्य चन्द्रोदयादनायासेन सिद्धिः॥

इति समाधिप्रकरणम्॥

॥ अथ प्रत्यनीकालङ्कारः ॥

प्रतिपक्षसंबन्धिनस्तिरस्कृतिः प्रत्यनीकम्। अत्र प्रतिपक्षगतं बलत्वमात्मगतं दुर्बलत्वं च गम्यते।

रे रे मनो मम मनोभवशासनस्य
पादाम्बुजद्वयमनारतमानमन्तम्।
किं मां निपातयसि संसृतिगर्तमध्ये
नैतावता तवगमिष्यति पुत्रशोकम् ॥

इति परिसंख्याप्रकरणम्॥

॥ अथ अर्थापत्तिः ॥

केनचिदर्थेन तुल्यन्यायतयाऽर्थान्तरस्या पत्तिः अर्थापत्यलङ्कारः।
यदिते चरणाम्बुजं प्रदावन्नतो
मे न हतो विपद्गणः।
अथ चण्डकरेण मण्डिते दिनमर्थे
विजित्य तमोगणैः॥

इत्युदाहरणम्। यत्तु कुवलयानन्दकृद्भिः उक्तम् कैमूत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यत इति तन्न कैमूतिकन्यायस्य न्यूनार्थविषयत्वे नाधिकार्थापत्तावव्याप्तेः।

तवाग्रे यदि दारिद्रयं स्थितं भूप द्विजन्मनाम्।
शनैस्सवित्पुप्यग्रेतमरस्थाप्यत्यसंशयम्॥

इत्यत्र शनैश्शब्दमहिम्ना राजाग्रे दारिद्रयस्थित्यपेक्षया सूर्याग्रे तमोऽवस्थानं दुश्शङ्कमेवेत्यवगमेऽपि न्यायसाम्यादापाद्यते न तु कैमुतिकन्यायेनेति॥

इति अर्थापत्तिप्रकरणम्॥

॥ अथ विकल्पः ॥

विरुद्धयोः पाक्षिकी प्राप्तिः विकल्पालङ्कारः। "हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्।" इति गीतावचनमुदाहरणम्।

इति विकल्पप्रकरणम्॥

॥ अथ समुच्चयः॥

युगपत्पदार्थानामन्वयः समुच्चयालङ्कारः। युगपदिति क्रमालङ्कारव्यावृत्यर्थम्। न त्वेकक्षणप्रतिपत्यर्थम्। न च समाध्यलङ्कारेऽतिव्याप्तिः। तस्मिन्नेकेन कार्ये निष्पाद्यमाने अन्येनाकस्मि कमापतताकारणेन सौकर्यादिरूपो

क्रियमाणां कविभिर्विशृंखलैः। कथमाळि शृणोषि सादरं
विपरीतार्थविदो हि योषितः॥ इत्युदाहरणं पञ्चमस्य॥

इति प्रतीपप्रकरणम्॥

॥ अथ प्रौढोक्तिः ॥

कस्मिंश्चिदर्थे किंचिद्धर्मकृतातिशय प्रतिपिपादयिषया प्रसिद्धधर्मवत्तासंसर्गस्य उद्भावनं प्रौदोक्तिः।

त्वदङ्कणसमुद्भूता सिक्ता कुङ्कुमवारिभिः।
त्वदङ्गतुलनां याति कदाचिल्लवलीलता॥

इत्युदाहरणम्। अत्र केवलया लवल्या उपमानताभरसहन सामर्थ्यस्या सिद्धये नायिकासामानाधिकरण्यम्। कुंङ्कमजल संयोगयोरुपादानम्॥

इति प्रौढोक्तिप्रकरणम्

॥ अथ ळळितालङ्कारः ॥

प्रकृतधर्मिणि प्रकृतव्यवहारानुल्लेखेन निरुप्यमाणो प्रकृतव्यवहारसंबन्धो ळळितालङ्कारः।

आदधानः परद्रव्यं विषं भक्षयसि ध्रुम्। इत्यादि निदर्शनावारणाय तृतीयातम्। अप्रस्तुत प्रशंसावारणाय प्रकृतधर्मिणीति।

नान्यास्ति किं भूमितले सुरूपा
सीतैव वा किं भवतोऽनुरूपा।
आकर्षता चन्दनशाखिशाखां
प्रबोधितो यं भवता फणीन्द्र॥

इत्युदाहरणं। अत्र राघवसंबन्धिनायिका हरणप्रयुक्तं तदीय क्रोधोद्बोधमनुक्त्वैव चन्दनसंबन्धिशाखाहरण प्रयुक्तफणीन्द्रप्रबोधनमुपन्यस्तम्।

इत्युदाहरणम्।

इति प्रत्यनीकप्रकरणम्॥

॥ अथ प्रतीपालङ्कारः

॥ अथ प्रतीपालङ्कारः ॥

प्रसिद्धौपम्यवैपरीत्येन वर्ण्यमानमौपम्यमेकं प्रतीपम्। उपमानस्य किंचिद्गुण प्रयुक्तमद्वितीयमुत्कर्षं परिहर्तुं द्वितीय प्रदर्शनेनोल्लास्यमानं सादृश्यं परं प्रतीपम्। उपमेयस्य किञ्चिद्गुण प्रयुक्तमद्वितीयोत्कर्षं परिहर्तुं द्वितीयप्रदर्शनेन उल्लास्यमानं सादृश्यं द्वितीयं प्रतीपम्।

उपमानस्य कैमर्थ्यं चतुर्थम् उपमानस्य सादृश्यविघटनं पञ्चमम्।
किं जल्पसि मुग्धतया हन्त तवाहं सुवर्णवर्णमिति।
तद्यदि पतिते हुताशे तदा हताशे तवांगवर्णं स्यात्॥

इत्युदाहरणम्। अत्र पूर्वार्धगतौपम्यं सवर्णवर्णाधिक्यं तिरस्कृत्य द्वितीयार्थे प्रतीपं बालांगवर्णस्याधिक्यं गमयति। हुताशपातं विना प्रतीपमपि दुर्लभम्। उपमा तु स्वप्नेऽपि न संभवतीति मुग्धत्वहताशत्वाभ्यां गम्यते।

माहाम्यस्य परोऽवधिर्निजगृहंगंभीरतायाः पिता
रत्नेनामहमेक एव भुवने को वाऽपरो मादृशः।
इत्येवं परिचिन्त्यमास्म सहसा गर्वान्धकारं गमो
दुग्धाब्धिर्भवता समो विजयते डिल्लीधरावल्लभः॥

इति द्वितीयस्य उदाहरणम्।
विभाव्य भूयो निजगौरिमाणं मानाममानं हृदये ऽपि यासीः।
गृहे गृहे पश्य तवांगवर्णा मुग्धे सुवर्णावलयो लुठन्ति॥

इति तृतीयस्य उदाहरणम्।

मुधापवादे मुग्धाक्षित्वन्मुखाभं किलाम्बुजम्।
इति चतुर्थस्योदाहरणम्। करिकुंभतुलामुरोजयोः

त्वदीयानां लीलालळितलहरीणांव्यतिकरात्
पुनीते सोऽपि द्रागिहहपवमानस्त्रिभुवनम्॥

इत्याधुदाहरणम्। अत्र गंगालहरीणां पावनातिशयेन पवमानस्य पावनत्वगुणान्तरं वर्णितम्।

विशालाभ्यामाभ्यां विपुलनयनाभ्यां किमुफलं
नयाभ्यामालीढा परमरमणी या तव तनुः॥
अयंतुन्दक्कारो जननिमनुजस्य श्रवणयोः
ययो र्नान्तर्यातस्तवमहरिलीला कळकळः॥

इत्युदाहरणे भागीरथीरमणीयत्वगुणेन तद्रूपविमुखयोः नयनयोः श्रवणयोश्च नैष्फल्यधिक्कार दोषौ॥

इति उल्लासप्रकरणम्

॥ अथ अवज्ञाऽलङ्कारः ॥

उल्लासस्य विपर्ययोऽवज्ञा।

निष्णातोऽपि च वेदान्ते वैराग्यं नैति दुर्मनः।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥

इत्युदाहरणम्। अत्र पूर्वार्धे वेदान्त शास्त्र विचारगुणप्रयुक्तस्य वैराग्यगुणस्य उत्तरार्धे द्रवत्वजलधिगुणप्रयुक्तस्य मैनाके मार्दवगुणस्य विपर्ययो वर्णितः॥

इति अवज्ञाप्रकरणम् ॥

॥ अथ अनुज्ञाप्रकरणम् ॥

उत्कटगुणविशेषलालसया दोषवत्वेन प्रसिद्धस्यापि वस्तुनः प्रार्थनमनुज्ञा।

प्रणिपत्य विधे भवन्तम् वितिबद्धाञ्जलिरेकमेव याचे।
जनिरस्तु कुले कृषीवलानामपि गोविन्दपदारविन्दभाजाम्॥

इत्युदाहरणम् । अत्र हरिभक्तिलालसया कृषीवलकुलजननप्रार्थनम् ॥

इति लळितप्रकरणम्॥

॥ अथ प्रहर्षणालङ्कारः ॥

साक्षात् तदुद्देश्यकयत्नमन्तरेणापि अभीष्टार्थस्य लाभः प्रहर्षणम्।

तिरस्कृतो दोषवशात्परिष्वजन्
प्रियो मृगाक्ष्या शपितः पराङ्मुखः।
किं मूर्च्छितोऽसाविति कान्दिशीकया
कयाचिदाचुम्ब्य चिराय सस्वजे॥

इत्युदाहरणम्। अत्र यत्नसामान्यशून्यस्यापीष्टलाभः

केळीमन्दिरमागतस्य शनकैराळीरपास्येगितै-
स्सुमायास्सरुषस्सरोरुहदृशस्संवीजनंकुर्वतः।
जानन्त्याप्यनभिज्ञयैव कपटयाऽऽमीलिताक्ष्या सखि
श्रान्तासीत्यभिधाय वक्षिस तया पाणिर्ममाधीयते॥

इत्युदाहरणे भामिन्या रोषनिवारणाय यत्ने क्रियमाणे रोषनिवारणादपि अधिकतरसुखप्रदः कामुकस्य कामिनीकर्तृकस्सकरकर्मकस्तत्कुचाधिकरणक आसङ्गः।

लोभाद्वराटिकानां विक्रेतुं तक्रमानिशामटन्त्या।
लब्धो गोपकिशोर्या मध्ये रथ्या जहेन्द्रमणिः॥ इत्यप्युदाहरणम्

इति प्रहर्षणप्रकरणम्॥

॥ अथ उल्लासः ॥

अन्यदीयगुणदोषप्रयुक्तमन्यस्य गुणदोषयोराधानमुल्लासः । तच्च गुणेन गुणस्य, दोषस्य वा, दोषेण दोषस्य गुणस्यवेति चतुर्धा।

अलभ्यं सौगन्ध्यं हरति सततं यस्सुमनसां
क्षणादेव प्राणानपि विरहशास्त्रक्षतहृदाम्।

नीतो नासान्तिकं तस्या मालत्या: कुसुमोत्कर:।

बन्धूक भावमानिन्ये रागेणाधरवृत्तिना॥ इत्युदाहरणम् ॥

॥ अथ मीलनालङ्कार :

स्फुटमुपलभ्यमानस्य कस्यचिद्वस्तुनोलिङ्गैरति साम्यात् भिन्नत्वेना गृह्यमाणानां वस्त्वन्तरलिंगानां स्वकारणानुमापकत्वं मीलनम्।

जलकुंम्भमुंभितरसं सपदि सरस्यास्समानयन्त्यास्ते।
तटकुञ्जगूढसूरतं भगवानेको मनोभवो वेद॥
इत्युदाहरणम्। अत्र सुरतगमकानां स्वेदाकर्यनिश्वासानां जलकुंभानयना वराजिजनितैस्तै ग्रहणात् सुरतस्याप्रकाश:॥

इति मीलनप्रकरणम् ॥

॥ अथ सामान्यालङ्कार: ॥

प्रत्यक्षविषयस्यापि वस्तुन: बलवत्सजातीयग्रहणकृतं तद्भिन्नत्वेना ग्रहणं सामान्य:मीलने निगूह्यमान वस्तुन: प्रत्यक्षाविषयत्वात् न तत्रातिष्याप्ति:।

यस्मिन्हिमानां निकरावदाते चन्द्रांशुकैवल्यमिव प्रयाते।
पुच्छाश्रयाभ्यां विकला इवाद्रौ चरन्ति शकासु चिरं चमर्य:॥

इत्युदाहरणम् अत्र चन्द्रिकात: पृथक्त्वेन हिमाद्रिचमर पुच्छयोरदर्शनात् उत्प्रेक्षोत्पत्तिरिति तस्यां सामान्यं गुण:॥

इति सामान्यप्रकरणम् ॥

अथ उत्तरालङ्कार। प्रश्नप्रतिबन्धकज्ञान विषयीभूतमुत्तरम् ॥ किमेकं दैवतमित्यादि प्रश्नानन्तरं प्रयुक्तं जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तम मित्यादि भीष्मवाक्यमुदाहरणमिति॥

॥ अर्थालङ्कारप्रकरणं समाप्तम् ॥

॥ हरि: ओम् ॥

इति अनुज्ञाप्रकरणाम् ॥

॥ अथ तिरस्कारः ॥

दोषविशेषानुसंधानात् गुणवत्त्वेन प्रसिद्धस्यापि द्वेषस्तिरस्कारः।

श्रियो मे मा सन्तु क्षणमपि च माद्यद्गजघटा
मदभ्राम्यद्भृंगावळिमधुरसंगीतसुभगाः ।
निमग्नानां या सं द्रविणरसपर्याकुलहृदां
सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥

इत्युदाहरणम्। हरिचरण भजनचच्युतिभयात् राज्य सुखस्य तिरस्कारः। अमुं च तिरस्कारं अलक्षयित्वाऽनुज्ञामात्रं लक्षयतां कुवलयानन्दकृतां विस्मरणमेव शरणम् ॥

इति तिरस्कारप्रकरणम् ॥

॥ अथलेशालङ्कारः ॥

गुणस्यानिष्टसाधनतया दोषत्वेन वर्णनं दोषस्येष्टसाधनतया गुणत्वेन वर्णनं च लेशः ॥

अभिमतगुरुगर्वं मास्म कस्तूरि यासी रखिलपरिमळानां मौळिना सौरभेण।
गिरीगहनगुहायां लीनमत्यन्तदीनम् स्वजनकममुनैव प्राणहींन करोषि ॥

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम्।
शाखिनोऽन्ये विराजन्ते पीहयन्ते चन्दनद्रुमाः ॥

इत्युदाहरणं क्रमेणावगन्तव्यम् ॥

इति लेशप्रकरणम् ॥

॥ अथ तद्गुणालङ्कारः ॥

स्वगुणत्यागपूर्वकं स्वसन्निहितवस्त्वन्तरसंबन्धिगुणग्रहणं तद्गुणः।



Printed by

Royapettah Stationery and Printing and Allied Products Producers Indl. - Co.op Society Ltd.

26, Koya Arunagiri First Street Royapettah

Madras - 600 014. ☎ : 84 56 70

Printed by

Royapettah Stationery and Printing and Allied Products Producers Indl. - Co.op Society Ltd.

26, Koya Arunagiri First Street Royapettah

Madras - 600 014. ☎ : 84 56 70